# Mahākāvya and Applied Grammar

# BA SANSKRIT

CORE COURSE (1)

## I SEMESTER

## (2011 Admission)


# UNIVERSITY OF CALICUT

## SCHOOL OF DISTANCE EDUCATION

CALICUT UNIVERSITY P.O., MALAPPURAM, KERALA, INDIA-673 635

# UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

Study material

BA SANSKRIT

I Semester

CORE COURSE (1)

**Mahākāvya and Applied Grammar**

**Prepared by:**
Dr. Jayanisha K.
Assistant Professor,
Department of Sanskrit
Sree Kerala Varma College,
Thrissur.

**Edited and Scrutinised by :**
Sri.K.Jayanarayanan,
Associate Professor,
Department of Sanskrit,
Sree Kerala Varma College,
Thrissur.

**Lay Out**
**Computer Section, SDE.**

©
Reserved

**Module I : An introduction to Sanskrit Mahākāvya literature refreshing the knowledge about Pañcamahākāvyas. Importance of this literature in modern prespective - social-ecological-political etc.**

**Module II : Study of language through Kāvya in traditional method and modern presepctive.**

Essential Reading :

1. *A Short History of Sanskrit Liiterature*, T. K. Ramachandra Iyer, R. S. Vadhyar & Sons, Kalpathi, Palakkad, 2002.
2. *Kirātārjunīya of Bhāravi*, Canto I.

# Module - I

## पञ्चमहाकाव्यानि।

कवयतीति कविः, तस्य कर्म काव्यम्। एतत् काव्यं गद्य-पद्य-मिश्रभेदेन त्रिविधं भवति। तत्र पद्यस्य बहवः भेदाः सन्ति। तेषु अन्यतमं भवति महाकाव्यम्। महाकाव्यमधिकृत्य ईशानसंहितायाम् एवमुक्तं भवति -

अष्टसर्गान्न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्।
नात्यन्तविस्तरः सर्गस्त्रिंशतो वा न चोनता।।

प्रसिद्धालङ्कारिकेण दण्डिमहाशयेन स्वस्य काव्यादर्शस्य प्रथमपरिच्छेदे महाकाव्यस्य समग्रं लक्षणम् एवमुक्तम् -

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्।।

इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।

नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः।।

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि।।

अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।।

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति।।इति।

महाकाव्यानि सर्गयुक्तानि भवेयुः। तेषाम् आरम्भे आशीर्वादपद्यं वा, नमस्क्रियापद्यं वा, वस्तुनिर्देशपद्यं वा कर्तव्यम्। नगरस्य, समुद्रस्य, पर्वतस्य, ऋतूनां, सूर्यचन्द्रयोः उदयस्य च वर्णनं करणीयम्। उद्यानं, जलक्रीडा, मधुपानं, सम्भोगविप्रलम्भशृङ्गारौ, विवाहः, पुत्रजन्म, मन्त्रः, दूतः, विजययात्रा, युद्धः, नायकोदयः - इत्येतेषां वर्णनैः युक्तानि भवेयुः। अत्र रसभाववृत्तसन्ध्यादयश्च अवश्यं करणीयाः। एतया रीत्या निर्मितानि महाकाव्यानि कल्पावसानपर्यन्तस्थायीनि जायन्ते।

संस्कृतकाव्यप्रपञ्चे प्रचलितानां महाकाव्यानां मध्ये पञ्चमहाकाव्यानि प्रसिद्धानि भवन्ति। तानि यथा -

१. कालिदासस्य रघुवंशः।
२. कालिदासस्य कुमारसम्भवम्।
३. भारवेः किरातार्जुनीयम्।
४. माघस्य शिशुपालवधम्।
५. श्रीहर्षस्य नैषधीयचरितम्।

## रघुवंशः।

विश्वसाहित्ये संस्कृतसाहित्यमिव संस्कृतसाहित्ये कालिदाससाहित्यं सुप्रसिद्धं भवति। तस्य जीवनकालजन्मदेशादिविषये विभिन्नमतानि प्रचलन्ति। कालिदासेन रघुवंशः, कुमारसम्भवमिति द्वे महाकाव्ये, मेघदूतम्, ऋतुसंहारः इति द्वे खण्डकाव्ये अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति त्रीणि नाटकानि च विरचितानि।

संस्कृतसाहित्ये वर्तमानेषु पञ्चमहाकाव्येषु रघुवंशः प्रथमस्थानमलङ्करोति। तत्र एकोनविंशतिसर्गाः सन्ति। कालिदासस्य उपमाप्रयोगस्य सुप्रसिद्धानि उदाहरणानि अस्मिन् काव्ये द्रष्टुं शक्यन्ते। 'दीपशिखा कालिदासः' इति प्रसिद्धोक्तेः उदाहरणं रघुवंशात् उद्धृतम् एव। अलङ्कारसंयोजने,प्रकृतिसौन्दर्यस्य वर्णनायां, ललितपदविन्यासे च कालिदासः अतीव वैदग्ध्यं प्रकटितवान्।

रघुवंशमहाकाव्यं वागर्थौ इव मिलितयोः पार्वतीपरमेश्वरयोः वन्दनया एव आरभ्यते। अत्र वंशस्थापकस्य रघोः पितुः दिलीपमहाराजस्य कथायाः आरभ्य अग्निवर्णपर्यन्तेकोनत्रिंशन्महाराजानां कथा अतिमनोहररीत्या वर्ण्यते। तत्रत्य आदिमसप्तदशसर्गेषु दिलीपादारभ्य अतिथिपर्यन्तसप्तमहाराजानां कथा विस्तरेण प्रतिपाद्यते। अष्टादशसर्गे विंशतिमहाराजानां कथा च वर्णिता। एकोनविंशतिसर्गे अन्तिमराजस्य विषयलम्पटस्य अग्निवर्णस्य शासनम्, अत एव सम्भूतं वंशनाशं च प्रतिपादयति। रघुवंशमहाकाव्ये अनेकेषां महाराजानां राज्यभारवर्णनानि तथा प्रकृतिसौन्दर्यद्योतकानि वर्णनानि च दृश्यन्ते। अनपत्यतया दुःखितयोः सुदक्षिणादिलीपयोः नन्दिनीपरिपालनं, ततः तयोः पुत्रप्राप्तिः, रघोः विजययात्रा, इन्दुमतीस्वयंवरवर्णनम्, अजविलापः, रामरावणयुद्धं, सीतारामयोः आकाशयात्रायां कृता प्रकृतिवर्णना च अत्र प्रधाना भवन्ति। एवं ललितपदसन्निवेशकृतैः वर्णनैः अतिमनोहरं भवति रघुवंशमहाकाव्यम्।

## कुमारसम्भवम्।

सप्तदशसर्गेषु निबद्धं कुमारसम्भवं महाकाव्यं कालिदासस्य सर्वोत्कृष्टं शृङ्गारकाव्यं भवति। पर्वतराजस्य महिमानम् उद्घुष्य प्रारब्धस्य अस्य महाकाव्यस्य प्रथमसर्गे पर्वतराजपुत्र्याः पार्वत्याः बाल्यादारभ्य चरितं, तस्याः श्रीपरमेश्वरं प्रति अनुरागवर्णनं च कृतम्। द्वितीये तारकासुरकृतोपद्रवाः पार्वतीपरमेश्वरयोः पुत्रस्यैव तारकासुरवधे शक्तिप्रभावः इति ब्रह्मोपदेशश्च वर्णिताः। तृतीये तु देवेन्द्रस्य आदेशेन कामदेवस्य रत्या वसन्तेन च सह तपश्चरतः परमेश्वरस्य समीपे आगमनं, परमेश्वरतृतीयनेत्राग्निना कामदेवदहनं च उपवर्ण्यन्ते। कामदहनानन्तरं दुःखितायाः रतीदेव्याः विलापः चतुर्थसर्गे विस्तरेण उपपाद्यते। पञ्चमे तु स्वाभिलाषपूर्तये पार्वत्याः तपश्चर्या, ब्रह्मचारिरूपेण श्रीपरमेश्वरस्य परीक्षणं, परमेश्वरस्य स्वरूपप्रदर्शनं च वर्ण्यविषयरूपेण दृश्यन्ते। पार्वतीपरमेश्वरयोः विवाहादारभ्य कुमारोत्पत्तिपर्यन्तकथा षष्ठ-सप्तम-अष्टमसर्गेषु उपवर्णिता। अष्टमसर्गपर्यन्तमेव इदं काव्यं कालिदासेन विनिर्मितमिति बहूनां पण्डितानां मतम्। किञ्च कालिदासकृतीनां व्याख्यात्रा मल्लिनाथेन अष्टमसर्गपर्यन्तमेव व्याख्यायते। किन्तु सप्तदशसर्गयुक्तकुमारसम्भवं महाकाव्यं कालिदासविरचितम् अद्य उपलभ्यते।

## किरातार्जुनीयम्।

संस्कृतसाहित्ये अलङ्कृतशैल्याः प्रवर्तकस्यापि भारवेः ध्यानं विशेषरूपेण अर्थगौरवे स्थितम्। अत एव 'भारवेरर्थगौरवम्'

इति लोकोक्तिः अत्यन्तख्यातिं प्राप्ता। कविवरः भारविः विपुलान् अर्थान् ललितेषु शब्देषु सन्निवेश्य स्वस्य काव्यकुशलतां प्रकटीकरोति। भारवेः जीवनकालमधिकृत्य विभिन्नमतानि सन्ति। तथापि सः क्रि. व. षष्ठशतके जीवनमधारयदिति विद्वांसः मन्यन्ते।

सर्वविधलक्षणयुक्ते किरातार्जुनीयमहाकाव्ये अष्टादशसर्गाः सन्ति। महाभारतस्य वनपर्वादुद्धृतः अर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तः अस्य इतिवृत्तम्। द्यूते पराजिताः युधिष्ठिरादयः वनवासपूर्त्यर्थं द्वैतवनं प्राप्तवन्तः। तत्रस्थाः ते दुर्योधनवृत्तान्तं विप्रवेषधारिणः कस्माच्चित् किरातदूतात् ज्ञात्वा दुर्योधनं प्रति युद्धं कर्तुं निश्चयं कुर्वन्ति। तदर्थं व्यासनिर्देशानुसारं अर्जुनः शिवात् पाशुपतास्त्रलाभाय हिमालये घोरतपः कर्तुम् आरब्धवान्। अर्जुनं परीक्षितुं शिवः किरातवेषेण तत्र आगच्छति। शूकरवधमधिकृत्य संजातः विवादः युद्धरूपेण परिणतः। तदवसरे अर्जुनस्य असामान्यपराक्रमपाटवं दृष्ट्वा संप्रीतः परमेश्वरः अर्जुनाय पाशुपतास्त्रं ददाति। एवं कृतं किरातार्जुनीयमहाकाव्यं सहृदयहृदयं हठादाकर्षयति।

**शिशुपालवधम्।**

संस्कृतमहाकविषु उपमा-अर्थगौरव-पदलालित्यानि प्रत्येकम् एकैकस्मिन् सन्ति। किन्तु एते त्रयो गुणाः माघे विशेषेण भासन्ते। अत एव उक्तम् 'माघे सन्ति त्रयो गुणाः' इति। माघस्य जीवनकालः क्रि. व. अष्टशतकमिति समालोचकैः अनुमितः।

शिशुपालवधस्य कर्ता माघः भवति। माघेन विरचितत्वात् एतत्काव्यं 'माघम्' इति नाम्नाऽपि प्रसिद्धम्। तत्र विंशतिसर्गाः सन्ति। महाभारताश्रिता शिशुपालवधात्मिका कथा अत्र वर्णिताऽस्ति। नारदात् युधिष्ठिरयज्ञवृत्तान्तं तथा शिशुपालवधाय शक्रसन्देशं च श्रुत्वा श्रीकृष्णः स्वसैन्यैः सह युधिष्ठिरसमीपं गच्छति। ततः द्वादशसर्गपर्यन्तं रैवतकपर्वतस्य षट्ऋतूनां, जलक्रीडायाः, प्रभातस्य, यमुनानद्याश्च वर्णनं दृश्यते। अनन्तरं कृष्णपाण्डवसमागमः, श्रीकृष्णस्य नगरप्रवेशः, शिशुपालस्य क्रोधः, युद्धाय सन्नद्धता, दूतसंवादः, प्रयाणं, युद्धम्, अन्तिमे शिशुपालस्य वधः च माघेन अतिमनोहररीत्या उपवर्णिताः। नवनवशब्दानां प्रयोगबाहुल्येन 'नवसर्गे गते माघे नवशब्दो न विद्यते' इति लोकोक्तिः अतिशयेन प्रचलिता।

**नैषधीयचरितम्।**

नैषधीयचरितमहाकाव्यस्य कर्ता श्रीहर्षः भवति। सः कान्यकुब्जाधीश्वरयोः विजयचन्द्रजयचन्द्रयोः सभापण्डितः आसीत्। तस्य जीवनकालः द्वादशशतकं भवति। तस्य पिता हीरः माता मामल्लदेवी च भवति।

पञ्चमहाकाव्येषु प्रौढं श्रेष्ठं च भवति नैषधीयचरितम्। तत्र द्वाविंशतिसर्गाः सन्ति। अस्य इतिवृत्तं महाभारतस्य नलोपाख्यानात् स्वीकृतमेव। नलश्रीवर्णनादारब्धमिदं महाकाव्यं नलदमयन्त्योः सुखसङ्गमं प्राप्य विश्राम्यति। तत्र प्रथमे दमयन्त्याः स्मृत्या विहरन् नलः एकं स्वर्णमयं हंसं पश्यति, तं गृह्णाति च। हंसः स्वामवस्थां निवेद्य मोचनं प्रार्थयति। राज्ञः प्रीत्यर्थं हंसः विदर्भानगरीं गत्वा तस्य अनुरागं दमयन्तीं प्रति ज्ञापयति। किन्तु तत्समये विदर्भराजेन दमयन्त्याः स्वयंवरसभा आयुज्यते। यद्यपि तत्र चत्वारः दिक्पालाः नलरूपं धृत्वा आगच्छन्ति, तथापि दमयन्त्याः नलं प्रति अनुरागं ज्ञात्वा ते स्वस्वरूपाण्येव गृह्णन्ति। ततः दमयन्ती नलं स्वयंवरस्रजा विभूषयति। अथ ईर्ष्यया कलिः नलं प्रविश्य तं

विरूपयति। अन्ते लब्धस्वरूपेण नलेन सह दमयन्त्याः सुखसङ्गमो भवति च।

अस्य काव्यस्य शैली, वर्णनारीतिः, पदानां प्रयोगाश्च अतिक्लिष्टं भवति। एवंकृतवैशिष्ट्यात् एवमुच्यते 'नैषधं विद्वदौषधम्' इति। काव्यानुशीलनार्थं साहित्यपठितृभिः उपयुक्तः आदिग्रन्थो भवति नैषधीयचरितम्। अत एव उक्तम् 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इति।

## इतराणि महाकाव्यानि

१. **बुद्धचरितम्** – क्रैस्तवीयस्य एकशतकस्य उत्तरार्धे निवसन् अश्वघोषः कनिष्कसभाङ्गः आसीत्। सुवर्णाक्षीपुत्रः सः बौद्धश्च भवति। तेन बुद्धचरितम्, सौन्दरनन्दम् इति काव्यद्वयं, शारीपुत्रप्रकरणं च विरचितम्।

प्रसिद्धीकृते बुद्धचरिते त्रयोदशसर्गाः सन्ति। किन्तु चीनपाठे अष्टविंशतिसर्गाः सन्ति इति श्रूयते। बौद्धेन संस्कृते विरचितं प्रथमं महाकाव्यं भवति बुद्धचरितम्। श्रीबुद्धस्य जीवनचरितम् अस्मिन् सम्यक् वर्णितम् इति पण्डितानां मतम्। अस्मिन् काव्ये रघुवंशस्य वाल्मीकिरामायणस्य च स्वाधीनं दरीदृश्यते।

२. **सौन्दरनन्दम्** – अष्टादशसर्गयुक्ते अस्मिन् काव्ये श्रीबुद्धस्य अर्धसोदरस्य नन्दस्य जीवनचरितं प्रतिपादयति। नन्दस्य पत्नीं प्रति स्नेहः, बौद्धधर्मस्वीकारे विमुखता, बुद्धशिष्येण आनन्देन नन्दस्य परिवर्तनं, नन्दपत्न्याः विलापः इत्यादयः अत्र उपवर्णितः।

३. **सेतुबन्धम्** – सेतुबन्धस्य कर्ता प्रवरसेनः भवति। हर्षचरितस्य आमुखे बाणः प्रवरसेनम् एवं स्मृतवान् –

> कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्वला।
> सागरस्य परं पारं कपिसेनेव सेतुना।। इति।

अस्मात् श्लोकसूचनात् प्रवरसेनस्य जीवनकालः क्रि. व. पञ्चशतकमिति ज्ञातुं शक्यते।

सेतुबन्धं महाकाव्यं रावणवधम् अथवा सेतुकाव्यम् इति नाम्नापि विश्रुतम्। प्राकृतभाषायां विलिखिते अस्मिन् काव्ये रामायणकथा विस्तरेण अतिमनोहररीत्या प्रतिपाद्यते।

४. **पद्यचूडामणिः** – बुद्धघोषेण विरचितं महाकाव्यं भवति पद्यचूडामणिः। सः क्रि. व. पञ्चशतके जीवनमधारयदिति विद्वांसैः मन्यन्ते। अस्मिन् महाकाव्ये दशसर्गाः सन्ति।

५. **जानकीहरणम्** – जानकीहरणस्य कर्ता कुमारदासः भवति। क्रि. व. षष्ठशतकस्य पूर्वार्धे निवसन् सिलोणराजा कुमारदासः एव भवति अस्य कर्ता इति केषाञ्चनपण्डितानां मतम्। सः सम्यग्रीत्या कालिदासं अनुकरोति इति जानकीहरणपठनात् ज्ञातुं शक्यते। तत्र विंशतिसर्गाः सन्ति। रामायणकथा-प्रतिपादके अस्मिन् काव्ये काशिकावृत्त्यनुसाराः व्याकरणविशेषाः अपि द्रष्टुं शक्यन्ते।

६. **भट्टिकाव्यम्** – भट्टिः क्रि. व. सप्तशतके जीवनमधारयत् इति विद्वांसैः मन्यन्ते। रावणवधो नाम महाकाव्यस्य

कर्ता भवति भट्टिः। भट्टिना विरचितत्वात् एतत् महाकाव्यं भट्टिकाव्यम् इति प्रसिद्धम्। तत्र द्वाविंशतिसर्गाः सन्ति। तत्र रामायणकथा विस्तरेण प्रतिपाद्यते।

७. **गौडवहो** – क्रि. व. अष्टशतके निवसन् वाक्पतिराजः कानौज्देशस्य महाराजस्य यशोवर्मणः सभापण्डितः आसीत्। तेन गौडवहो इति प्राकृतमहाकाव्यं मधुमथन विजयं च विरचितम्। तयोः मधुमथनविजयम् अधुना नोपलभ्यते। गौडवहोमहाकाव्ये यशोवर्ममहाराजस्य गौडराजकुमारं प्रति विजयः विस्तरेण ललितपदविन्यासेन उपन्यस्यते।

८. **धर्मशर्माभ्युदयम्** – धर्मशर्माभ्युदयस्य कर्ता हरिश्चन्द्रः भवति। सः नवमशतकस्य पूर्वार्धे जीवनमकरोत्। अस्मिन् काव्ये एकविंशतिसर्गाः सन्ति। तत्र जैनसन्यासिनः धर्मनाथस्य जीवनचरितं प्रतिपाद्यते।

९. **हरविजयम्** – राजानकरत्नाकरवागीश्वरविरचितं महाकाव्यं भवति हरविजयम्। सः जयापीडअवन्तिवर्मणोः सभापण्डितः आसीत्। तस्य कालः क्रिस्तोः पश्चात् नवमशतकमासीत् इति प्रसिद्धिः। पञ्चाशत्सर्गैर्युक्तं बृहन्महाकाव्यं भवति हरविजयम्। शिवेन कृतम् अन्धकासुरवधमस्य इतिवृत्तम्।

१०. **कप्फणाभ्युदयम्** – क्रिस्तोः पश्चात् नवमशतके निवसन् शिवस्वामी काश्मीरराजस्य अवन्तिवर्मणः सभापण्डितः आसीत्। विंशतिसर्गैर्युक्तं कप्फणाभ्युदयं नाम महाकाव्यं शिवस्वामिना विरचितं भवति। बौद्धः आसीत् शिवस्वामी। महाकाव्येऽस्मिन् दक्षिणभारतराज्ञस्य कप्फणस्य बुद्धमतस्वीकारः एव वर्ण्यते। अस्य इतिवृत्तं अवदानशतकात् स्वीकृतं भवति।

११. **नलोदयम्** – वासुदेवः क्रि. व. नवमशतके जीवनमधारयत् इति मन्यन्ते। सः नलोदयमहाकाव्यस्य कर्ता भवति। तत्र चत्वारः सर्गाः सन्ति। अस्मिन् महाकाव्ये नलमहाराजस्य कथा, तस्य नष्टराज्यस्य पुनःप्राप्तिश्च विस्तरेण प्रतिपाद्यते।

१२. **नवसाहसाङ्कचरितम्** – नवसाहसाङ्कचरितस्य कर्ता पद्मगुप्तः भवति। सः परिमलः इति नाम्नापि प्रस्तूयते। सः क्रि. व. एकादशशतके जीवनमकरोत्। सः धारादेशस्य सिन्धुराजस्य सभापण्डितः आसीत्। सिन्धुराजस्य 'नवसाहसाङ्कः' इति बिरुदमस्ति। तस्य निर्देशानुसारमेव पद्मगुप्तः एतत्काव्यं विरचितवान्।

१३. **विक्रमाङ्कदेवचरितम्** – बिल्हणेन विरचितं महाकाव्यं भवति विक्रमाङ्कदेवचरितम्। सः एकादशशतकस्य उत्तरार्धे जीवनमधारयदिति मन्यन्ते। विक्रमाङ्कदेवचरिते अष्टादशसर्गाः सन्ति।

१४. **रामायणमञ्जरी** – अस्य कर्ता काश्मीरकविः क्षेमेन्द्रः भवति। सः क्रिस्तोः पश्चात् एकादशशतके जीवनमकरोत्। रामायणकथामधिकृत्य विरचितं महाकाव्यं भवति रामायणमञ्जरी।

१५. **भारतमञ्जरी** – अस्य कर्ता क्षेमेन्द्रः भवति। तेन महाभारतकथामाश्रित्य विरचितं बृहत्काव्यं भवति भारतमञ्जरी।

१६. **बृहत्कथामञ्जरी** – अस्यापि कर्ता क्षेमेन्द्रः भवति। तेन बृहत्कथामाधारीकृत्य विरचितं महाकाव्यं भवति बृहत्कथामञ्जरी।

१७. **गोविन्दपट्टाभिषेकम्** – कृष्णलीलाशुकविरचितं काव्यं भवति गोविन्दपट्टाभिषेकम्। सः क्रि. व. एकादशशतके

जीवनमधारयदिति मन्यन्ते। द्वादशसर्गैर्युक्तेऽस्मिन् काव्ये लीलाशुकः स्वेष्टदेवस्य श्रीकृष्णस्य माहात्म्यं वर्णयति। लीलाशुकः विल्वमङ्गलम् इति नाम्ना प्रसिद्धः। तेन, 'श्रीकृष्णकर्णामृतं' नाम प्रसिद्धं स्तोत्रकाव्यं विरचितम्।

१८. **नेमिनिर्वाणम्** - अस्य कर्ता वाग्भटः भवति। तस्य कालः द्वादशशतकमिति श्रूयते। अस्मिन् काव्ये जैनभिक्षोः नेमिनाथस्य कथा वर्ण्यते। वाग्भटस्य अलङ्कारशास्त्रग्रन्थः भवति वाग्भटालङ्कारः।

१९. **राजतरङ्गिणी** - कल्हणविरचितं काव्यं भवति राजतरङ्गिणी। तस्य कालः क्रि. व. द्वादशशतकमिति मन्यन्ते। अस्मिन् काव्ये बहुधा ऐतिहासिकचरितमपि लिखितम् वर्तते।

२०. **कुमारपालचरितम्** - हेमचन्द्रेण विरचितं काव्यं भवति कुमारपालचरितम्। तस्य कालः क्रि. व. द्वादशशतकमिति श्रूयते। इदं काव्यम् ऐतिहासिककाव्येषु अन्यतमत्वेन पण्डितैः गण्यते।

२१. **श्रीकण्ठचरितम्** - अस्य कर्ता मङ्खकः भवति। सः क्रि. व. द्वादशशतकमध्ये जीवनमकरोत्। मङ्खकः अलङ्कारसर्वस्वस्य कर्तुः रुय्यकस्य शिष्यः आसीत्। पञ्चविंशतिसर्गैर्युक्ते श्रीकण्ठचरिते शिवस्य त्रिपुरदहनं विस्तरेण प्रतिपाद्यते।

२२. **राघवपाण्डवीयम्** - कविराजेन विरचितं महाकाव्यं भवति राघवपाण्डवीयम्। सः क्रि. व. द्वादशशतके जीवनमधारयदिति ए. बि. कीथ् महाशयस्य मतम्। अस्मिन् काव्ये राम-पाण्डवानां कथा युगपत् प्रतिपाद्यते। तत्तु समासप्रयोगशैल्या द्वयर्थयुक्तपदप्रयोगशैल्या च कविना साध्यते। केचित् विमर्शकाः एवं वदन्ति -

> श्रीमद्रामायणं गङ्गा भारतं सागरो महान्।
> तत्संयोजनकार्यज्ञौ कविराजभगीरथौ।। इति।

२३. **राघवपाण्डवीयम्** - जैनभिक्षुः धनञ्जयः राघवपाण्डवीयम् इति नाम्ना एकं महाकाव्यं व्यलिखत्। तस्य कालः अपि क्रिस्तोः पश्चात् द्वादशशतकमिति मन्यते। एतत्महाकाव्यं द्विसाधनकाव्यम् इति नाम्नापि श्रूयते।

२४. **राघवपाण्डवयादवीयम्** - अस्य महाकाव्यस्य कर्ता चिदम्बरकविः भवति। सः क्रि. व. सप्तदशशतके जीवनमकरोत्। अस्मिन् काव्ये रामायण-महाभारत-श्रीमद्भागवतकथाः संयोज्य वर्ण्यन्ते।

२५. **राघवनैषधीयम्** - हरदत्तसूरिविरचितं महाकाव्यं भवति रैघवनैषधीयम्। तस्य कालः क्रि. व. सप्तदशशतकमासीत्। अस्मिन् काव्ये राम-नलयोः कथा संयोजनरूपेण प्रतिपाद्यते।

२६. **रसिकरञ्जनम्** - अस्य कर्ता रामचन्द्रः भवति। तस्य कालः क्रि. व. षोडशशतकम् आसीत्।

२७. **राघवाभ्युदयम्** - वेङ्कटनाथविरचितं महाकाव्यं भवति यादवाभ्युदयम्। सः वेदान्तदेशिकः इति नाम्ना प्रसिद्धः।

तस्य कालः क्रि. व. त्रयोदशशतकमिति मन्यते। तेन शताधिकाः कृतयः विरचिताः। चतुर्विंशतिसर्गैर्युक्ते यादवाभ्युदये श्रीकृष्णकथा प्रतिपाद्यते। अस्मिन् काव्ये रघुवंशस्य स्वाधीनम् अधिकतया द्रष्टुं शक्यते। कालिदासस्य मेघदूतमनुकृत्य वेङ्कटनाथेन हंससन्देशः इति सन्देशकाव्यमपि विरचितम्।

२८. **सहृदयानन्दम्** - अस्य काव्यस्य कर्ता कृष्णानन्दः भवति। अस्मिन् काव्ये पञ्चदशसर्गाः सन्ति। अत्र नलकथा ललितपदविन्यासेन अलङ्कारप्रयोगेण च उपन्यस्यते।

२९. **मधुराविजयम्** - अस्य कर्त्री गङ्गादेवी भवति। तस्याः जीवनकालः क्रि. व. चतुर्दशशतकमासीत्। विजयनगरस्य राज्ञः कम्पणस्य कथा अस्मिन् काव्ये विस्तरेण प्रतिपाद्यते।

३०. **श्रीकृष्णविलासम्** - सुकुमारकविविरचितं महाकाव्यं भवति श्रीकृष्णविलासम्। तस्य कालः क्रि. व. पञ्चदशशतकमिति विद्वांसैः मन्यते। द्वादशसर्गैर्युक्ते अस्मिन् महाकाव्ये श्रीमद्भागवतस्य दशमस्कन्धस्य कथा अतिमनोहररीत्या प्रतिपाद्यते।

३१. **युधिष्ठिरविजयम्** - अस्य यमककाव्यस्य कर्ता वासुदेवकविः भवति। सः क्रि. व. पञ्चदशशतके जीवनमधारयदिति ज्ञायते। युधिष्ठिरविजये एकविंशतिसर्गाः सन्ति।

३२. **शिवलीलार्णवम्** - अस्य कर्ता नीलकण्ठदीक्षितः भवति। तस्य जीवनकालः सप्तदशशतकमासीत्। शिवलीलार्णवे द्वाविंशतिसर्गाः सन्ति। तत्र शिवस्य लीला विस्तरेण प्रतिपाद्यते।

३३. **गङ्गावतरणम्** - नीलकण्ठदीक्षितेन विरचितम् इतरत् महाकाव्यं भवति गङ्गावतरणम्। तत्र अष्टसर्गाः सन्ति। सः नीलकण्ठविजयचम्पूः अपि विरचितवान्।

३४. **रुक्मिणीकल्याणम्** - क्रि. व. सप्तदशशतके निवसन् राजचूडामणिदीक्षितः रुक्मिणीकल्याणनामकस्य महाकाव्यस्य कर्ता भवति। रुक्मिणी श्रीकृष्णयो कथाप्रतिपादके अस्मिन् महाकाव्ये दशसर्गाः सन्ति।

३५. **जानकीपरिणयम्** - चक्रकविविरचितं महाकाव्यं भवति जानकीपरिणयम्। तत्र अष्टसर्गाः सन्ति।

३६. **रघुनाथाभ्युदयम्** - रामभद्राम्बा (सप्तदशशतकम्)।

३७. **आङ्गलसाम्राज्यम्** - ए. आर्. राजराजवर्मराजा (विंशतिशतकम्)।

३८. **पतञ्चलिचरितम्** - (अष्टसर्गाः) रामभद्रदीक्षितः (अष्टादशशतकम्)।

*****

## Module - II

## किरातार्जुनीयम्।

**किरातः** - वनचरः। अत्र तु किरातवेषधारी शिवः।

**अर्जुनः** - तृतीयः पाण्डवः।

किरातश्च अर्जुनश्च किरातार्जुनौ (द्वन्द्वसमासः), किरातार्जुनौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्। 'अधिकृत्य

कृते ग्रन्थे' (४-३-८७) इत्यनुवर्तमाने 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' (४-३-८८) इति सूत्रेण छ प्रत्ययः। 'आयनेयीनीयियः फधखछघां प्रत्ययादीनाम्' (७-१-२) इति सूत्रेण छस्य ईय्। किरातार्जुनीयमित्यन्वर्था संज्ञा।

किरातार्जुनीये भारविनामा कविः -

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।(काव्यप्रकाशः, I, २)

इत्याद्यालाङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनताम्, 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्रस्याऽसत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुः, चिकीर्षितार्थाऽविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्कथामुपक्षिपति इति मल्लिनाथः।

**श्रियः कुरूणामधिपस्य पालनीं**
**प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**
**स वर्णिलिङ्गी विदितः समाययौ**
**युधिष्ठिरं द्वैतवने वनेचरः।। १।।**

**पदच्छेदः -** श्रियः कुरूणाम्, अधिपस्य, पालनीम्, प्रजासु, वृत्तिम्, यम्, अयुङ्क्त, वेदितुम्, सः, वर्णिलिङ्गी, विदितः, समाययौ, युधिष्ठिरम्, द्वैतवने, वनेचरः।

**अन्वयः -** कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त, वर्णिलिङ्गी सः वनेचरः विदितः (सन्) द्वैतवने युधिष्ठिरं समाययौ।

**अर्थः।**

**कुरूणाम्** - कुरुजनपदविशेषाणाम्। **अधिपस्य** - स्वामिनः (दुर्योधनस्य)। **श्रियः** - राजलक्ष्म्याः (राजसम्पत्त्याः)। आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिर्नात्रातीवोपयुज्यते। तदुक्तम् -

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा।।

**पालनीं** - प्रतिष्ठापिकाम्। **प्रजासु** - जनेषु विषये (तद्राष्ट्रान्तर्गतेषु जनेषु)। **वृत्तिं** - व्यवहारम्। **वेदितुं** - ज्ञातुम्। **यम्** - अज्ञातनामानम् (वनेचरः)। **अयुङ्क्त** - नियुक्तवान्। **वर्णिलिङ्गी** - ब्रह्मचारिस्वरूपधारी। **वनेचरः** - किरातः (आरण्यकः) **विदितः** - परवृत्तान्तज्ञानवान्। **द्वैतवने** - द्वैताख्ये तपोवने। शोकमोहादिवर्जिते इत्यर्थः। **युधिष्ठिरं** - धर्मराजम्। **समाययौ** - सम्प्राप्तवान् (समागतः)।

सम् आङ् इत्युपसर्गद्वयपूर्वक या - प्रापणे धातोः लिट् परस्मैपदरूपाणि।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | समाययौ | समाययतुः | समाययुः। |
| **मध्यमपुरुषः** | समाययिथ/समाययाथ | समाययथुः | समायय। |
| **उत्तमपुरुषः** | समाययौ | समाययिव | समाययिम। |

युजिर् - योगे धातोः लङ् परस्मैपदरूपाणि

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | अयुनक् | अयुङ्क्ताम् | अयुञ्जन् |
| **म. पु.** | अयुनक् | अयुङ्क्तम् | अयुङ्क्त |
| **उ. पु.** | अयुनजम् | अयुञ्ज्व | अयुञ्ज्म |

**विग्रहः/समासः।**

अधिपस्य - अधि पातीति अधिपः, तस्य अधिपस्य।

पालनीम् - पाल्यते अनया इति पालनी, तां पालनीम्।

वर्णलिङ्गी - वर्णः - प्रशस्तिः अस्यास्तीति वर्णी - ब्रह्मचारी।

यदुक्तम् -

स्मरणं कीर्तनं केलिः प्रेक्षणं गुप्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च।।

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।।

एतदष्टविधमैथुनाऽभावः प्रशस्तिः। 'वर्णाद् ब्रह्मचारिणि' इति प्रत्ययः। तस्य लिङ्गं - चिह्नमस्यास्तीति वर्णिलिङ्गम्, तदस्यास्तीति वर्णिलिङ्गी।

वनेचरः - वने चरतीति वनेचरः।

विदितम् - वेदनम् अस्यास्तीति विदितः।

द्वैतवने - द्वे इते - गते यस्मात्तद् द्वीतम् द्वीतमेव द्वैतम्, तच्च तद्वनञ्च द्वैतवनम्, तस्मिन् द्वैतवने।

युधिष्ठिरम् - युधि - रणे स्थिरम् - युधिष्ठिरम्। 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक्। 'गवियुधिभ्यां स्थिरः' इति षत्वम्।

**कोशः**

'लक्ष्मी पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरः।

'भेदाः किरातशबरपुलिन्दाम्लेच्छजातयः' इत्यमरः।

**अलङ्कारः** - वृत्त्यनुप्रासः। अत्र 'वने वनेचरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकदैवावृत्त्या वृत्त्यनुप्रासो नामालङ्कारः।

**वृत्तम्** - वंशस्थम्। (अस्मिन्सर्गे वंशस्थवृत्तम्)। लक्षणम् - जतौ तु वंशस्थमुदीरितं जरौ।

ज त ज र

– U – U U – – U – U – U

यथा - श्रियःकु/ रूणाम/ धिपस्य/ पालनीं।
प्रजासु /वृत्तिं य /मयुङ्क्त /वेदितुम्।

वंशस्थवृत्तं समानवृत्तत्वात् चतुर्ष्वपि पादेषु समानमेव लक्षणं ज्ञेयम्।

**सारः** - कुरुजनपदानां स्वामिनः दुर्योधनस्य राज्यलक्ष्म्याः स्थितिसम्पादिनी जनेषु व्यवहारं ज्ञातुं यं वनेचरं

नियुक्तवान् सः परवृत्तान्ताभिज्ञो ब्रह्मचारिस्वरूपो वनेचरः द्वैततपोवने युधिष्ठिरं प्राप।

**कृतप्रणामस्य महीं महीभुजे**
**जितां सपत्नेन निवेदयिष्यतः।**
**न विव्यथे तस्य मनो न हि प्रियं**
**प्रवक्तुमिच्छन्ति मृषा हितैषिणः।। २।।**

**पदच्छेदः** - कृतप्रणामस्य, महीम्, महीभुजे, जिताम्, सपत्नेन, निवेदयिष्यतः, न, विव्यथे, तस्य, मनः, न, हि, प्रियम्, प्रवक्तुम्, इच्छन्ति, मृषा, हितैषिणः।

**अन्वयः** - कृतप्रणामस्य, सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः तस्य मनः न विव्यथे। हि हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति।

**अर्थः।**

**कृतप्रणामस्य** - विहितनमस्कारस्य (तत्कालोचितत्वात्कृतनमस्कारस्य)। **सपत्नेन** - शत्रुणा (दुर्योधनेन इत्यर्थः)। **जितां** - व्याजद्यूतेनात्मसात्कृताम्। **महीं** - पृथ्वीम्। **महीभुजे** - भूपतये (युधिष्ठिरायेत्यर्थः)। **निवेदयिष्यतः** - ज्ञापयिष्यतः। **तस्य** - पूर्वप्रेषितस्य (वनेचरस्य)। **मनः** - मानसम् (हृदयम्)। **न विव्यथे** - न चचाल। (न व्यथितम्)। **हि** - यस्मात्करणात्। **हितैषिणः** - स्वामिहितार्थिनः (प्रभुकल्याणेच्छवः)। **मृषा** - मिथ्याभूतम् (मिथ्यात्मकम्)। **प्रियं** - श्रवणसुखदं वचनम्। **प्रवक्तुं** - निवेदयितुं। **न** - न भ्रमादपि। **इच्छन्ति** - अभिलषन्ति।

व्यथ - भयसञ्चलनयोः धातोः लिट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | विव्यथे | विव्यथाते | विव्यथिरे |
| **म. पु.** | विव्यथिषे | विव्यथाथे | विव्यथिध्वे |
| **उ. पु.** | विव्यथे | विव्यथिवहे | विव्यथिमहे |

इष - इच्छायां धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | इच्छति | इच्छतः | इच्छन्ति। |
| **म. पु.** | इच्छसि | इच्छथः | इच्छथ। |
| **उ. पु.** | इच्छामि | इच्छावः | इच्छामः। |

**विग्रहः/समासः**

कृतप्रणामस्य - कृतः प्रणामो येन सः कृतप्रणामः, तस्य कृतप्रणामस्य।

महीभुजे - महीं भुनक्तीति महीभुक् (उपपदसमासः), तस्मै महीभुजे।

हितैषिणः - हितमिच्छन्तीति हितैषिणः।

**कोशः।**

'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः।

'गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही' इत्यमरः।

'मृषा मिथ्या तु वितथे' इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः। **लक्षणम्** - उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।

**सारः** - विहितनमस्कारस्य शत्रुणा स्वायत्तीकृतां भूमिं युधिष्ठिराय निवेदयिष्यतः तस्य वनेचरस्य चित्तं न व्यथां प्राप। कुत इति चेत् शुभेच्छवः असत्यप्रियवचनं अभिधातुं नाभिलषन्ति।

**द्विषां विघाताय विधातुमिच्छतो**
**रहस्यनुज्ञामधिगम्य भूभृतः।**
**स सौष्ठवौदार्यविशेषशालिनीं**
**विनिश्चितार्थामिति वाचमाददे।। ३।।**

**पदच्छेदः** - द्विषाम्, विघाताय, विधातुम्, इच्छतः, रहसि, अनुज्ञाम्, अधिगम्य, भूभृतः, सः, सौष्ठवौदार्यविशेषशालिनीम्, विनिश्चितार्थाम्, इति वाचम्, आददे।

**अन्वयः** - द्विषां विघाताय विधातुम् इच्छतः भूभृतः अनुज्ञाम् अधिगम्य सः रहसि सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आददे।

**अर्थः।**

**द्विषाम्** - शत्रूणाम्। **विघाताय** - नाशाय। अत्र 'तमर्थाच्च भाववचनात्' इति सूत्रेण चतुर्थी। विधातुम् - व्यापारं कर्तुम्, येनोपायेन शुत्रुसंहरेण भवेत् तं कर्तुम्। **इच्छतः** - अभिलषतः। **भूभृतः** - भूपतेः (युधिष्ठिरस्य)। **अनुज्ञाम्** - आज्ञाम्। **अधिगम्य** - प्राप्य (धृत्वा)। **सः** - सः वनेचरः। **रहसि** - एकान्ते, (निर्जने)। **सौष्ठवौदार्यविशेषशालिनीम्** - शब्दार्थगुणशोभिताम्। **विनिश्चितार्थाम्** - विशेषरूपेण प्रकटार्थाम्। **इति** - वक्ष्यमाणरूपाम्। **वाचम्** - वाणीम्। **आददे** - स्वीकृतवान्।

आङ् उपसर्गपूर्वक दाञ् - दाने धातोः लिट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | आददे | आददाते | आददिरे |
| **म. पु.** | आददिषे | आददाथे | आददिध्वे |
| **उ. पु.** | आददे | आददिवहे | आददिमहे |

**विग्रहः/समासः।**

भूभृतः - भुवं बिभर्तीति भूभृत् (उपपदसमासः) तस्य भूभृतः।

सौष्ठवौदार्यविशेषशालिनीम् - सुष्ठु भावः सौष्ठवम् (कर्म), उदारस्य भावः औदार्यम् (कर्म), सौष्ठवं च औदार्यं च सौष्ठवौदार्ये (द्वन्द्वः), तयोः (सौष्ठवौदार्ययोः) विशेषः सौष्ठवौदार्यविशेषः (षष्ठी. तत्पु.), तेन शालते (शोभते) या सा सौष्ठवौदार्यविशेषशालिनी (बहु.) तां सौष्ठवौदार्यविशेषशालिनीम्।

विनिश्चितार्थाम् - विशेषेण निश्चितः (निर्णीतः) अर्थः यस्या सा विनिश्चितार्था (बहु.), तां विनिश्चितार्थाम्।

**कोशः।**

भूभृद् भूमिधरे नृपे इत्यमरः।

**सारः** - एकान्ते सः किरातः शत्रूणां विनाशाय व्यापारं कर्तुमभिलषतः राज्ञः आज्ञां प्राप्य शब्दसामर्थ्यार्थसम्पत्तिरूपविशेषशोभमानां निर्णीताभिप्रायां वक्ष्यमाणरूपां वाणीम् उवाच।

**क्रियासु युक्तैर्नृप! चारचक्षुषो**
**न वञ्चनीयाः प्रभवोऽनुजीविभिः।**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा**
**हितं मनोहारि च दुर्लभं वचः।। ४।।**

**पदच्छेदः** - क्रियासु, युक्तैः, नृप, चारचक्षुषः, न, वञ्चनीयाः, प्रभवः, अनुजीविभिः, अतः, अर्हसि, क्षन्तुम्, असाधु, साधु, वा, हितं, मनोहारि, च, दुर्लभम्, वचः।

**अन्वयः** - (हे) नृप! क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः। अतः असाधु वा साधु क्षन्तुमर्हसि। हितं, मनोहारि च वचः दुर्लभम् (भवति)।

**अर्थः।**

**हे नृप!** - हे नरेश! (युधिष्ठिर!)। **क्रियासु** - कर्तव्यविषयेषु। **युक्तैः** - नियुक्तैः। **अनुजीविभिः** - अनुचरैः (भृत्यैः)। **चारचक्षुषः** - गूढचरदृशः। **प्रभवः** - स्वामिनः। **न वञ्चनीयाः** - न प्रतारणीयाः। **अतः** - अस्मात्कारणात्। **असाधु** - सम्यगप्रियम्। **साधु** - सम्यक् प्रियम्। **क्षन्तुम्** - सोढुम्। **अर्हसि** - योग्योऽसि। **हितं** - परिणामकल्याणकरम्, सद्यः प्रियम्। **मनोहारि** - मनोहरम्। **वचः** - वचनम्। **दुर्लभम्** - दुष्प्रयोज्यम्।

अर्ह - पूजायाम् धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | अर्हति | अर्हतः | अर्हन्ति। |
| **म. पु.** | अर्हसि | अर्हथः | अर्हथ। |
| **उ. पु.** | अर्हामि | अर्हावः | अर्हामः। |

**विग्रहः/समासः।**

अनुजीविभिः - अनुजीवन्ति तच्छीलाः अनुजीविनः, तैः अनुजीविभिः।

चारचक्षुषः - चरन्तीति चराः (कृत्), चराः एव चाराः (कर्म), चारा एव चक्षूंषि येषां ते चारचक्षुषः (बहु.)।

दुर्लभम् - दुःखेन लभ्यते यत्तत् दुर्लभम्।

मनोहारि - मनो हरन्तीति मनोहारि।

**कोशः।**

सेवकार्थ्यनुजीविभिः इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**सारः** - हे राजन्! कार्येषु नियुक्तैः अनुचरैः दूतनयनाः स्वामिनः न प्रतारणीयाः। अस्मात्कारणात् अयुक्तं युक्तं वा मद्वचः सोढुम् अर्हसि। कुत इति चेत् पथ्यं प्रियं च वचनं दुर्लभ एव। भृत्यैः प्रभोरवञ्चनीयत्वात् मदुक्तमप्रियमपि हितकरं चेत् क्षन्तव्यमेवेत्यर्थः।

**स किंसखा साधु न शास्ति योऽधिपं**
**हितान्न यः संशृणुते स किंप्रभुः।**
**सदाऽनुकूलेषु हि कुर्वते रतिं**
**नृपेष्वमात्येषु च सर्वसम्पदः।। ५।।**

**पदच्छेदः** - सः, किंसखा, साधु, न, शास्ति, यः, अधिपम्, हितात्, न, संशृणुते, सः, किंप्रभुः, सदा, अनुकूलेषु, हि, कुर्वते,रतिम्, नृपेषु, अमात्येषु, च, सर्वसम्पदः।

**अन्वयः** - यः अधिपं साधु न शास्ति सः किंसखा। यः हितात् न संशृणुते सः किंप्रभुः। हि, सदा अनुकूलेषु नृपेषु अमात्येषु च सर्वसम्पदः रतिं कुर्वते।

**अर्थः।**

**यः** - कश्चित्। **अधिपम्** - स्वामिनम्। **साधु** - सम्यक् परिणामहितकरम्। **न शास्ति** - न उपदिशति। **सः** - असम्यगुपदेष्टजनः। **किंसखा** - किं विचारकः। (नासौ सखा)। **यः** - कश्चित्। **हितात्** - हितोपदेशकात्। **न संशृणुते** - न शृणोति। **सः** - हितवचनश्रवणविमुखः। **किंप्रभुः** - न प्रभुः (अविवेकवानित्यर्थः) **हि** - यस्मात्कारणात्। **सदा** - सर्वदा (सततम्)। **अनुकूलेषु** - अविरुद्धेषु (अन्योन्यानुरक्तेषु।) **नृपेषु** - राजसु। **अमात्येषु** - मन्त्रिषु। **च** - अपि। **सर्वसम्पदः** - सकलसम्पत्तयः। **रतिं** - अनुरागम्। **कुर्वते** - कुर्वन्ति।

शासु - अनुशिष्टौ धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | शास्ति | शिष्टः | शासति। |
| **म. पु.** | शास्सि | शिष्ठः | शिष्ठ। |
| **उ. पु.** | शास्मि | शिष्वः | शिष्मः। |

डुकृञ् - करणे (उभयपदी) धातोः लट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | कुरुते | कुर्वाते | कुर्वते। |
| **म. पु.** | कुरुषे | कुर्वाथे | कुरुध्वे। |
| **उ. पु.** | कुर्वे | कुर्वहे | कुर्महे। |

**विग्रहः/समासः।**

अधिपम् - अधि पातीति अधिपः तम् अधिपम्।

किंसखा - कुत्सितः सखा किंसखा (कर्म)।

किंप्रभुः - कुत्सितः प्रभुः किंप्रभुः (कर्म)।

सर्वसम्पदः - सर्वाः सम्पदः सर्वसम्पदः (कर्म)।

रतिम् - रम्यते अनया इति रतिः। तां रतिम्।

**कोशः।**

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**सारः** - यः सुहृत् स्वामिनं सम्यक् नोपदिशति सः कुत्सितमित्रम्, एवं यः स्वामी हितोपदेष्टुः हितवचनं नाकर्णयति स कुत्सितस्वामी च भवति। यतो हि परस्परानुरागवत्सु क्षितिपतिषु सचिवेषु च सकलसम्पत्तयः सर्वदा प्रीतिं विदधते। यः अमात्यः राजानं सम्यक् नोपदिशति एवं यः राजा अमात्यहितवचनन्नाकर्णयति तावुभाप्रशंसनीयौ भवतः। तत्र कारणमुच्यते

- अन्योन्यस्नेहवत्सु नृपतिसचिवेष्वेव सकलसम्पदनुरागो भवति। अतः मया वक्तव्यं भवता श्रोतव्यं चेत्यर्थः।

**निसर्गदुर्बोधमबोधविक्लवाः**

**क्व भूपतीनां चरितं क्व जन्तवः।**

**तवानुभावोऽयमवेदि यन्मया**

**निगूढतत्त्वं नयवर्त्म विद्विषाम्।। ६।।**

**पदच्छेदः** - निसर्गदुर्बोधम्, अबोधविक्लवाः, क्व, भूपतीनाम्, चरितम्, क्व, जन्तवः, तव, अनुभावः, अयम्, अवेदि, यत्, मया, निगूढतत्त्वम्, नयवर्त्म, विद्विषाम्।

**अन्वयः** - निसर्गदुर्बोधं भूपतीनां चरितं क्व? अबोधविक्लवाः जन्तवः क्व? मया विद्विषां निगूढतत्त्वं नयवर्त्म यत् अवेदि (तत्) अयं तव अनुभावः।

**अर्थः।**

**निसर्गदुर्बोधम्** - स्वभावदुर्ग्रहम्। **भूपतीनां** - महीपतीनाम्। **चरितं** - व्यवहारः (कृत्यम्, चरित्रम्)। **क्व?** - कुत्र अस्ति? **अबोधविक्लवाः** - अज्ञानोपहताः। **जन्तवः** - शरीरिणः (मादृशपामरवनेचराः इत्यर्थः) **क्व?** - कुत्र वर्तन्ते? उभयोः समन्वयः स्वप्नेऽपि नास्तीति भावः। **मया** - वनेचरेण। **विद्विषाम्** - भवच्छत्रूणाम् (दुर्योधनादीनाम्)। **निगूढतत्त्वं** - संवृतयाथार्थ्यम्। **नयवर्त्म** - राजनीतिपथः। **अवेदि** - ज्ञातम्। (**तत्**) - ज्ञानरूपम्। **अयं तव** - युधिष्ठिरस्य। **अनुभावः** - प्रभावः (महिमेत्यर्थः)।

**विग्रहः/समासः।**

दुर्बोधम् - दुःखेन बुध्यते (ज्ञायते) इति दुर्बेधम्।

निसर्गदुर्बोधम् - निसर्गेण दुर्बोधम् निसर्गदुर्बोधम् (तृ. तत्पु.)। निसर्गात् दुर्बोधम् निसर्गदुर्बोधम् (प. तत्पु.)।

अबोधविक्लवाः - अबोधेन विक्लवाः अबोधविक्लवाः (तृ. तत्पु.)।

निगूढतत्त्वम् - निश्चयेन गूढं निगूढम् (तृ. तत्पु.), निगूढं तत्त्वं यस्य तत् निगूढतत्त्वम् (बहु.)।

नयवर्त्म - नयस्य वर्त्म नयवर्त्म (ष. तत्पु.)।

अनुभावः - अनुगतः भावः अनुभावः (प्रादिसमासः)।

**कोशः।**

'स्वरूपञ्च स्वभावश्च निसर्गश्चाथ' इत्यमरः।

'जन्तु-जन्य-शरीरिणः' इत्यमरः।

**अलङ्कारः** - विषमः। (द्वितीयं विषमम्)। **लक्षणम्** - विरूपकार्यस्योत्पत्तिरपरं विषमं मतम्।

**सारः** - स्वभावदुरवगमं राज्ञां चरितं क्व? अज्ञानयुक्ताः मादृशाः प्राणिनः क्व? नोभयंघटनसम्भवः। मया शत्रूणां गुप्ततात्पर्यं नीतिमार्गः यदज्ञायि तत्तवप्रभावेनैव, न ममेत्यर्थः।

**विशङ्कमानो भवतः पराभवं**

**नृपासनस्थोऽपि वनाधिवासिनः।**

**दुरोदरच्छद्मजितां समीहते**

**नयेन जेतुं जगतीं सुयोधनः।। ७।।**

**पदच्छेदः** - विशङ्कमानः, भवतः, पराभवम्, नृपासनस्थः, अपि, वनाधिवासिनः, दुरोदरच्छद्मजिताम्, समीहते, नयेन, जेतुम्, जगतीम्, सुयोधनः।

**अन्वयः** - नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः सुयोधनः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते।

**अर्थः।**

**नृपासनस्थः अपि** - सिंहासनस्थोऽपि। **वनाधिवासिनः** - काननिवासिनः (विपिने विहरतः)। **भवतः** - त्वत्तः (युधिष्ठिरात्)। **पराभवम्** - पराजयम्। **विशङ्कमानः** - मन्यमानः (उत्प्रेक्षमाणः)। **सुयोधनः** - दुर्योधनः। **दुरोदरच्छद्मजिताम्** - द्यूतकपटवशीकृताम्। **जगतीम्**- महीम्। **नयेन** - नीत्या। **जेतुम्** - वशीकर्तुम्। **समीहते** - चेष्टते (व्याप्रियते)। सम् उपसर्गपूर्वक ईह - चेष्टायाम् धातोः लट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | समीहते | समीहेते | समीहन्ते। |
| **म. पु.** | समीहसे | समीहेथे | समीहध्वे। |
| **उ. पु.** | समीहे | समीहावहे | समीहामहे। |

**विग्रहः/समासः।**

नृपासनस्थः - नृपस्य आसनं नृपासनम् (ष. तत्पु.), तस्मिन् तिष्ठतीति नृपासनस्थः (स. तत्पु.)।

वनाधिवासिनः - वनमधिवसतीति वनाधिवासी, तस्मात् वनाधिवासिनः।

सुयोधनः - सुखेन युध्यते इति सुयोधनः।

दुरोदरच्छद्मजिताम् - दुरोदरस्य - द्यूतस्य छद्म - कपटं दुरोदरच्छद्म (ष. तत्पु.), तेन - दुरोदरच्छद्मना जिता इति दुरोदरच्छद्मजिता (तृ. तत्पु.), तां दुरोदरच्छद्मजिताम्।

**कोशः।**

'पराभवः परिभवः परिभूतः पराजयः' इति कोषः।

'दुरोदरे द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्। लक्षणम् - समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।

**व्याकरणविशेषः।**

१. **महात्मभिः समम्** - 'सहयुक्तेऽप्रधाने' इति सूत्रेण सहार्थे समयुक्ते महात्मभिः इति तृतीया स्यात्।

**सारः** - दुर्योधनः सिंहासनवर्त्यपि वनौकसः त्वत्तः सकाशात् पराजयं सन्दिहानः द्युतव्याजायत्तीकृतां महीं नीत्या वशीकर्तुम् इच्छति। द्यूतव्याजादधिगतराज्योऽपि सुयोधनः भवतः पराभवशङ्कया नीतिपूर्वकराज्यकार्यसम्पादनद्वारा लोकान् वशीकर्तुमिच्छतीत्यर्थः। स्वापेक्षया युधिष्ठिरस्य अधिकपराक्रमशालित्वात् राज्यस्य च व्याजप्राप्तत्वात् शङ्कितहृदयस्य तस्य स्थैर्यं नास्तीति भावः।

**तथाऽपि जिह्मः सः भवज्जिगीषया**
**तनोति शुभ्रं गुणसम्पदा यशः।**
**समुन्नयन्भूतिमनार्यसङ्गमा-**
**द्वरं विरोधोऽपि समं महात्मभिः।। ८।।**

**पदच्छेदः** - तथापि, जिह्मः, सः, भवज्जिगीषया, तनोति, शुभ्रम्, गुणसम्पदा, यशः, समुन्नयन्, भूतिम्, अनार्यसङ्गमात्, वरम्, विरोधः, अपि, समम्, महात्मभिः।

**अन्वयः** - तथापि जिह्मः सः भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति। भूतिं समुन्नयन् अनार्यसङ्गमात् महात्मभिः समं विरोधः अपि वरम्।

**अर्थः।**

**तथापि** - साशङ्कोऽपि। **जिह्मः** - वक्रः (कुटिलः)। **सः** - दुर्योधनः। **भवज्जिगीषया** - भवन्तं जेतुमिच्छया। **गुणसम्पदा** - दयादाक्षिण्यादिगौरवेण। **शुभ्रम्** - अमलम्। **यशः** - कीर्तिम्। **तनोति** - विस्तारयति। **भूतिम्** - ऐश्वर्यम् (राजलक्ष्मीम्)। **समुन्नयन्** - संवर्द्धयन् सन्। **अनार्यसङ्गमात्** - नीचजनसंसर्गात्। **महात्मभिः** - महानुभावैः (भवादृशैः)। **समम्** - सह। **विरोधः अपि** - विग्रहः अपि। **वरम्** - ईषत्प्रियम्।

तनु - विस्तारे करणे च धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | तनोति | तनुतः | तन्वन्ति। |
| **म. पु.** | तनोषि | तनुथः | तनुथ। |
| **उ पु.** | तनोमि | तनुवः/तन्वः | तनुमः/तन्मः। |

**विग्रहः/समासः।**

भवज्जिगीषया - जेतुम् इच्छा जिगीषा, भवतः जिगीषा भवज्जिगीषा (प. तत्पु.), तया भवज्जिगीषया।

गुणसम्पदा - गुणानां सम्पद् गुणसम्पत् (ष. तत्पु.), तया गुणसम्पदा।

अनार्यसङ्गमात् - न आर्यः अनार्यः (नञ्. तत्पु.), अनार्यस्य सङ्गमः अनार्यसङ्गमः (ष. तत्पु.), तस्मात् अनार्यसङ्गमात्।

महात्मभिः - महान् आत्मा येषां ते महात्मनः (बहु.), तैः महात्मभिः।

**कोशः।**

'जिह्मस्तु कुटिलोऽलसे' इत्यमरः।

'विभूतिर्भूतिरैश्वर्यम्' इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्, अर्थान्तरन्यासः।

**सारः** - साशङ्कोऽपि कुटिलः सः दुर्योधनः गुणैः भवन्तमाक्रमितुमिच्छया दानदाक्षिण्यादिगुणगौरवेण स्वच्छं कीर्तिं विस्तारयति। उत्कर्षमापादयन् सज्जनैः सह विद्वेषोऽपि दुर्जनसम्पर्कापेक्षया ईषत्प्रियः।

**कृतारिषड्वर्गजयेन मानवी-**
**मगम्यरूपां पदवीं प्रपित्सुना।**
**विभज्य नक्तन्दिवमस्ततन्त्रिणा**
**वितन्यते तेन नयेन पौरुषम्।। ९।।**

**पदच्छेदः** - कृतारिषड्वर्गजयेन, मानवीम्, अगम्यरूपाम्, पदवीम्, प्रपित्सुना, विभज्य, नक्तन्दिवम्, अस्ततन्त्रिणा, वितन्यते, तेन, नयेन, पौरुषम्।

**अन्वयः** - कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं पदवीं प्रपित्सुना अस्ततन्द्रिणा तेन नक्तन्दिवं विभज्य नयेन पौरुषं वितन्यते।

**अर्थः।**

**कृतारिषड्वर्गजयेन** - वशीकृतकामक्रोधादिषड्वैरिणा। षड्वैरिणः - काम-क्रोध-लोभ-मद-मोह-मात्सर्याः। **अगम्यरूपाम्** - दुर्विज्ञेयाम् (दुष्प्रापाम्)। **मानवीम्** - मनुसम्बन्धिनीम् (मनुप्रोक्ताम्)। **पदवीम्** - प्रजापालनपद्धतिम्। **प्रपित्सुना** - प्राप्तुमिच्छुना। **अस्ततन्द्रिणा** - निरलसेन। **तेन** - तेन दुर्योधनेन। **नक्तन्दिवम्** - अहोरात्रम्। **विभज्य** - विभागं कृत्वा (समयविभागं विधाय)। **नयेन** - न्यायेन (नीतिपथेन, नीतिशास्त्रानुसारेण)। **पौरुषम्** - पौरुषाचरणम् (उद्योगः तेजो वा)। **वितन्यते** - विस्तार्यते।

**विग्रहः/समासः।**

कृतारिषड्वर्गजयेन - षण्णां वर्गः षड्वर्गः (ष. तत्पु.), अरीणां षड्वर्गः अरिषड्वर्गः (ष. तत्पु.), अरिषड्वर्गस्य जयः अरिषड्वर्गजयः (ष. तत्पु.)। कृतः अरिषड्वर्गजयः येन तेन कृतारिषड्वर्गजयेन (बहु.)।

अगम्यरूपाम् - न गम्यम् अगम्यम् (नञ्. तत्पु.), अगम्यं रूपं यस्याः सा अगम्यरूपा (बहु.), ताम् अगम्यरूपाम्।

मानवीम् - मनोः इयं मानवी, तां मानवीम्।

प्रपित्सुना - प्राप्तुम् इच्छुना प्रपित्सुना।

अस्ततन्द्रिणा - अस्ता तन्द्रिः यस्य येन वा सः अस्ततन्द्रिः (बहु.), तेन अस्ततन्द्रिणा।

नक्तन्दिवम् - नक्तं च दिवा च नक्तन्दिवम् (द्वन्द्वसमासः)।

पौरुषम् - पुरुषस्य कर्म पौरुषम् (ष.तत्पु.)।

**कोशः।**

'रिपो वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः।

'विजयो जयः' इत्यमरः।

'नयो न्याये' इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्।

**सारः** - कामक्रोधलोभमोहमदमात्सर्यरूपारिषट्कविजयिना दुष्प्राप्यां मनूक्तसदाचारयुक्तां प्रजापालनपद्धतिं प्रतिपत्तुमिच्छुना अनलसेन दुर्योधनेन रात्रिन्दिवं विभागं कृत्वा नीत्या सामर्थ्यं विस्तार्यते। असौ दुर्योधनः साम्प्रतं नीतिशास्त्रमवलम्ब्यैव तिष्ठतीति भावः।

**सखीनिव प्रीतियुजोऽनुजीविनः**
**समानमानान् सुहृदश्च बन्धुभिः।**
**न सन्ततं दर्शयते गतस्मयः**
**कृताधिपत्यामिव साधु बन्धुताम्।। १०।।**

**पदच्छेदः** - सखीन्, इव, प्रीतियुजः, अनुजीविनः, समानमानान्, सुहृदः, च, बन्धुभिः, न, सन्ततम्, दर्शयते, गतस्मयः, कृताधिपत्याम्, इव, साधु, बन्धुताम्।

**अन्वयः** - गतस्मयः सः सन्ततम् अनुजीविनः प्रीतियुजः सखीन् इव, सुहृदः बन्धुभिः समानमानान् बन्धुतां च कृताधिपत्याम् इव साधु दर्शयते।

**अर्थः।**

**गतस्मयः** - निरहङ्कारः (नम्रः इत्यर्थः)। **सः** - सः दुर्योधनः। **सन्ततम्** - सततम् (सर्वदा)। **अनुजीविनः** - अनुचरान् (भृत्यान्)। **प्रीतियुजः** - स्नेहसमन्वितान् (स्निग्धान्)। **सखीन्** - मित्राणि। **इव** - इव। **सुहृदः** - मित्राणि। **बन्धुभिः** - भ्रातृप्रभृति निजपरिवारैः। **समानमानान्** - समसत्कारान्। **बन्धुताम्** - बान्धववृन्दम्। **च - कृताधिपत्याम्** - विहितसर्वाधिकाराम्। **इव साधु** - सम्यक् (निर्व्याजम्)। **दर्शयते** - प्रकटयति (बोधयते)।

दृशिर् - प्रेक्षणे धातोः णिचि लट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | दर्शयते | दर्शयेते | दर्शयन्ते। |
| **म. पु.** | दर्शयसे | दर्शयेथे | दर्शयध्वे। |
| **उ. पु.** | दर्शये | दर्शयावहे | दर्शयामहे। |

**विग्रहः/समासः।**

गतस्मयः - गतः स्मयो यस्य सः गतस्मयः (बहु.)।

अनुजीविनः - अनु (पश्चात्) जीवनं येषां ते अनुजीविनः (बहु.), तान् अनुजीविनः।

प्रीतियुजः - प्रीत्या युञ्जन्ति ये ते प्रीतियुजः (बहु.),तान् प्रीतियुजः।

सुहृदः - सुष्ठु हृदयं येषां ते सुहृदः (बहु.), तान् सुहृदः।

समानमानान् - समानः मानो येषां ते समानमानाः (बहु.), तान् समानमानान्।

बन्धुताम् - बन्धूनां समूहो बन्धुता (ष. तत्पु.), तां बन्धुताम्।

कृताधिपत्यम् - अधिपतेः कर्म आधिपत्यम् (कर्म.), कृतम् आधिपत्यं यया सा कृताधिपत्या (बहु.), तां कृताधिपत्याम्।

**सारः** - त्यक्तमदः स दुर्योधनः सततं सम्यक् भृत्यान् स्नेहपात्रान् मित्राणीव, मित्राणि ज्ञातिभिः तुल्यसत्कारान्, ज्ञातिसमूहं कृतस्वाम्यमिव च बोधयते। असौ दुर्योधनः भृत्येषु मित्रभावं, मित्रेषु बन्धुभावं, बन्धुषु स्वामिभावं च बोधयतीत्यर्थः।

**असक्तमाराधयतो यथायथं**
**विभज्य भक्त्या समपक्षपातया।**
**गुणानुरागादिव सख्यमीयिवान्**
**न बाधतेऽस्य त्रिगणः परस्परम्।। ११।।**

**पदच्छेदः** - असक्तम्, आराधयतः, यथायथम्, विभज्य, भक्त्या, समपक्षपातया, गुणानुरागात्, इव, सख्यम्, ईयिवान्, न, बाधते, अस्य, त्रिगणः, परस्परम्।

**अन्वयः** - यथायथं विभज्य समपक्षपातया भक्त्या असक्तमाराधयतः अस्य गुणानुरागात् सख्यमीयिवान् इव त्रिगणः परस्परं न बाधते।

**अर्थः।**

**यथायथं** - यथोचितम्। **विभज्य** - विभागं कृत्वा (असङ्कीर्णरूपं विविच्य इत्यर्थः)। **समपक्षपातया** - तुल्यव्यवहारेण। **भक्त्या** - अनुरागविशेषेण। **असक्तम्** - अनासक्तम्। **आराधयतः** - भजतः। **अस्य** - अस्य दुर्योधनस्य। **गुणानुरागात्** - दयादाक्षिण्यौदार्यशौर्यगाम्भीर्यप्रभृतिसल्लक्षणस्नेहाद्। **सख्यम्** - मैत्रीम्। **ईयिवान्** - उपेयिवान्। **इव** - इव। **त्रिगणः** - धर्मार्थकामेत्येवं रूपः। **परस्परम्** - अन्योन्यम्। **न बाधते** - न बाधां करोति।

बाधृ - लोटने धातोः लट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | बाधते | बाधेते | बाधन्ते। |
| **म. पु.** | बाधसे | बाधेथे | बाधध्वे। |
| **उ. पु.** | बाधे | बाधावहे | बाधामहे। |

**विग्रहः/समासः।**

समपक्षपातया - पक्षे पातः पक्षपातः (स. तत्पु.), समः पक्षपातः यस्यां सा समपक्षपाता (बहु.), तया समपक्षपातया।

असक्तम् - न सक्तम् असक्तम् (नञ्. तत्पु.)।

गुणानुरागात् - गुणेषु अनुरागः गुणानुरागः (स. तत्पु.),तस्मात् गुणानुरागात्।

सख्यम् - सख्युः भावः सख्यम् (कर्म)।

त्रिगणः - त्रयाणां गणः त्रिगणः (ष. तत्पु.)।

**कोशः।**

'यथार्थं तु यथायथम्' इत्यमरः।

'मिथोऽन्योन्यं परस्परम्' इति कोशः।

**अलङ्कारः** - उत्प्रेक्षा। लक्षणम् - संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।

**सारः** - यथायोग्यं पृथक्कृत्य (असङ्कीर्णरूपं विविच्य) तुल्यासक्तिविशेषयानुरागेण अनासक्तं सेवमानस्यास्य दुर्योधनस्य त्रिवर्गः - धर्मार्थकामरूपाः गुणाः गुणवदाश्रयलोभात् सुहृत्त्वं उपगतवानिव अन्योन्यं न हन्ति। समभावेन धर्मार्थकामसेविनः दुर्योधनस्य त्रिवर्गे प्रत्यहं वर्धत एव न क्षिणोतीति भावः।

**निरत्ययं साम न दानवर्जितं**
**न भूरिदानं विरहय्य सत्क्रियाम्।**
**प्रवर्तते तस्य विशेषशालिनी**
**गुणानुरोधेन विना न सत्क्रिया।। १२।।**

**पदच्छेदः** - निरत्ययम्, साम, न, दानवर्जितम्, न, भूरिदानम्, विरहय्य, सत्क्रियाम्, प्रवर्तते, तस्य, विशेषशालिनी, गुणानुरोधेन, विना, न, सत्क्रिया।

**अन्वयः** - तस्य निरत्ययं साम  दानवर्जितं न (प्रवर्तते), सत्क्रियां विरहय्य भूरिदानं न (प्रवर्तते), विशेषशालिनी सत्क्रिया (च) गुणानुरोधेन विना न प्रवर्तते।

**अर्थः।**

**तस्य** - दुर्योधनस्य। **निरत्ययम्** - निर्विघ्नम्। **साम** - सान्त्वम् (प्रियवचनम्)। **दानवर्जितम्** - धनप्रयोगरहितम्। **न प्रवर्तते** - नैव प्रवर्तते। अर्थात् यस्योपरि प्रसन्नो भूत्वा प्रियवाक्यं ब्रूते, तस्मै नियतं धनमपि ददाति। **सत्क्रियाम्** - सत्कारम् (सम्मानम्)। **विरहय्य** - विहाय। **भूरिदानम्** - बहुलम् धनप्रयोगः। न प्रवर्तते। ससम्मानमेव धनं ददाति, न अपमानं कृत्वा कस्मैचित्किमपि ददाति। **विशेषशालिनी** - प्रशंसनीयः। **सत्क्रिया** - सत्कारः। **गुणानुरोधेन** - गुणपक्षपातेन। **विना** - ऋते। **न प्रवर्तते** - नैव प्रवर्तते। अर्थात् गुणिनं जनमेव दुर्योधनो मानयति। यं च मानयति, तस्मै धनमपि ददाति। तदपि प्रियकथाकथनपूर्वकमेवेति भावः।

प्र उपसर्गपूर्वकवृत - वर्तने धातोः लट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | प्रवर्तते | प्रवर्तेते | प्रवर्तन्ते। |
| **म. पु.** | प्रवर्तसे | प्रवर्तेथे | प्रवर्तध्वे। |
| **उ. पु.** | प्रवर्ते | प्रवर्तावहे | प्रवर्तामहे। |

**विग्रहः/समासः।**

निरत्ययम् - निर्गतः अत्ययः यस्मात् तद् निरत्ययम् (बहु.)।

दानवर्जितम् - दानेन वर्जितम् दानवर्जितम् (तृ. तत्पु.)।

सत्क्रियाम् - सती चासौ क्रिया च सत्क्रिया (कर्म.), तां सत्क्रियाम्।

विशेषशालिनी - विशेषेण शालते या सा विशेषशालिनी (बहु.)।

गुणानुरोधेन - गुणानामनुरोधः गुणानुरोधः (ष. तत्पु.), तेन गुणानुरोधेन।

**कोशः।**

'साम सान्त्वमुभे समे' इत्यमरः।

'अनुरोधो अनुवर्तनं' इत्यमरः।

**अलङ्कारः** - एकावली।

लक्षणम् - स्थाप्यते अपोह्यते वापि यथापूर्वं परं परम्।
विशेषणतया वस्तु यत्र सैकावली मता।। इति।

**व्याकरणविशेषः।**

१. **गुणानुरोधेन विना** - 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' इति सूत्रेण विना योगे गुणानुरोधेन इति तृतीयाविभक्तिः स्यात्।

**सारः** - तस्य दुर्योधनस्य निर्बाधं सान्त्वं दानरहितं न प्रवर्तते। प्रचुरं दानं सत्कारं अनादृत्य न प्रवर्तते। अतिशययोगिनी आदरक्रिया गुणानुरागेण विना न प्रवर्तते। असौ दुर्योधनः धनादिदानपूर्वकं लोकान् सान्त्वयति, आदरपूर्वकं च ददाति। गुणवतश्च सत्करोतीति भावः।

**वसूनि वाञ्छन्न वशी न मन्युना**
**स्वधर्म इत्येव निवृत्तकारणः।**
**गुरूपदिष्टेन रिपौ सुतेऽपि वा**
**निहन्ति दण्डेन स धर्मविप्लवम्।। १३।।**

**पदच्छेदः** - वसूनि, वाञ्छन्, न, वशी, न, मन्युना, स्वधर्मः, इति, एव, निवृत्तकारणः, गुरूपदिष्टेन, रिपौ, सुते, अपि, वा, निहन्ति, दण्डेन, सः, धर्मविप्लवम्।

**अन्वयः** - वशी सः वसूनि वाञ्छन् न , मन्युना न, निवृत्तकारणः (सन्) स्वधर्मः एव इति गुरूपदिष्टेन दण्डेन रिपौ वा सुते अपि धर्मविप्लवं निहन्ति।

**अर्थः।**

**वशी** - सर्वतन्त्रस्वतन्त्रः (जितेन्द्रियः)। **सः** - दुर्योधनः। **वसूनि** - धनानि। **वाञ्छन्** - इच्छन्। **न** - जनं न पीडयतीत्यर्थः। **मन्युना** - क्रोधेन। **न** - न निहन्तीत्यर्थः। **निवृत्तकारणः (सन्)** - कारणरहितः सन्। **स्वधर्मः** - राजधर्मः एव (अस्माकम् इत्यतः)। **गुरूपदिष्टेन** - मनु-याज्ञवल्क्य-नारद-वसिष्ठादि विरचितशास्त्रोपदेशानुसारेण। **दण्डेन** - दमेन। **रिपौ वा** - शत्रौ वा। **सुते अपि** - आत्मजे अपि। **धर्मविप्लवम्** - धर्मविरुद्धम्। **निहन्ति** - दण्डयति।

नि उपसर्गपूर्वक हन् हिंसागत्योः धातोः लट् परस्मैपदरूपाणि

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | निहन्ति | निहतः | निघ्नन्ति। |
| **म. पु.** | निहंसि | निहथः | निहथ |
| **उ. पु.** | निहन्मि | निहन्वः | निहन्मः। |

**विग्रहः/समासः।**

वशी - वशे सन्ति इन्द्रियाणि यस्य सः वशी (बहु.)।

निवृत्तकारणः - निवृत्तानि कारणानि यस्मात् सः निवृत्तकारणः (बहु.)।

धर्मविप्लवम् - धर्मस्य विप्लवः धर्मविप्लवः (ष. तत्पु.), तं धर्मविप्लवम्।

गुरूपदिष्टेन - गृणाति उपदिशति, गीर्यते वा इति गुरुः। गुरुभिः उपदिष्टः गुरूपदिष्टः (तृ. तत्पु.), तेन गुरूपदिष्टेन।

**कोशः।**

'मन्युर्दैन्ये कृतौ क्रुधि' इत्यमरः।

**अलङ्कारः** - अनुप्रासः। लक्षणम् - अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।

**सारः** - जितेन्द्रियः सः दुर्योधनः धनानि अभिलषन् कोपेन न। किन्तु निवृत्तकोपलोभादिनिमित्तः सन् स्वधर्म इत्येव हेतोः गुरुशिक्षितेन शिक्षया शत्रौ पुत्रेऽपि धर्मव्यतिक्रमं निवारयति। असौ दुर्योधनः दुष्टान् शास्ति, शिष्टान् पालयति च। अस्य सम्बन्धानुरोधेन क्वचित् पक्षपातो नास्तीति भावः।

**विधाय रक्षान्परितः परेतरा-**
**नशङ्कितताकारमुपैति शङ्कितः।**
**क्रियाऽपवर्गेष्वनुजीविसात्कृताः**
**कृतज्ञतामस्य वदन्ति सम्पदः।। १४।।**

**पदच्छेदः** - विधाय, रक्षान्, परितः, परेतरान्, अशङ्किताकारम्, उपैति, शङ्कितः, क्रियापवर्गेषु, अनुजीविसात्कृताः, कृतज्ञताम्, अस्य, वदन्ति, सम्पदः।

**अन्वयः** - शङ्कितः (सन्नपि सः) परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपैति। क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञतां वदन्ति।

**अर्थः।**

**शङ्कितः** - सन्देहापन्नः। (सन्नपि) **परितः** - सर्वत्र (स्वराष्ट्रे परराष्ट्रेऽपि)। **परेतरान्** - आत्मीयान्। **रक्षान्** - रक्षकान्। **विधाय** - कृत्वा। **अशङ्किताकारम्** - निःशङ्कत्वम्। **उपैति** - प्राप्नोति। **क्रियापवर्गेषु** - कार्यसमाप्तिषु। **अनुजीविसात्कृताः** - भृत्याधीनाः कृताः। **सम्पदः** - धनानि (विभूतयः)। **अस्य** - अस्य दुर्योधनस्य। **कृतज्ञताम्** - उपकारज्ञताम्। **वदन्ति** - कथयन्ति।

उप उपसर्गपूर्वक इण् - गतौ धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | उपैति | उपेतः | उपयान्ति। |
| **म. पु.** | उपैषि | उपेथः | उपेथ। |
| **उ. पु.** | उपैमि | उपेवः | उपेमः। |

वद - व्यक्तायां वाचि धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | वदति | वदतः | वदन्ति। |
| **म. पु.** | वदसि | वदथः | वदथ। |
| **उ. पु.** | वदामि | वदावः | वदामः। |

**विग्रहः/समासः।**

शङ्कितः - शङ्का संजाता अस्य इति शङ्कितः।

परेतरान् - परेभ्यः इतरे परेतरे (प. तत्पु.), तान् परेतरान्।

अशङ्कितताकारम् - शङ्का जाता अस्य इति शङ्कितः, न शङ्कितः अशङ्कितः (नञ् तत्पु.), अशङ्कितस्य आकारः अशङ्किताकारः (ष. तत्पु.), तम् अशङ्किताकारम्।

क्रियापवर्गेषु - अपवृज्यते (भुज्यते) संसारः अनेन इति अपवर्गः। क्रियायाः अपवर्गाः क्रियापवर्गाः (ष. तत्पु.), तेषु क्रियापवर्गेषु।

कृतज्ञताम् - कृतं जानातीति कृतज्ञः, तस्य भावः कृतज्ञता (कर्म.), तां कृतज्ञताम्।

अनुजीविसात्कृताः - अनुजीविनामधीनाः कृताः अनुजीविसात्कृताः।

**अलङ्कारः** - अनुप्रासः।

**सारः** - स दुर्योधनः सञ्जातशङ्कः सन् सर्वत्र आत्मीयान् रक्षकान् कृत्वा विश्वस्ताकृतिं प्राप्नोति। कार्यावसानेषु भृत्यायत्तीकृताः सम्पत्तयः अस्य दुर्योधनस्य कृतोपकारित्वं कथयन्ति। स्वयमविश्वस्तः दुर्योधनः आत्मीयान् रक्षकान् नियुज्य विश्वस्तः सन् तिष्ठति। सेवकार्पितश्चास्य सम्पदः कृतज्ञत्वं प्रकाशयन्ति नोक्तिमात्रेणेति भावः। उपकारिणि नृपे सेवकानुरागो जायते, अनुरागवन्तस्ते सेवकाः नृपं रक्षन्तीति भावः।

**अनारतं तेन पदेषु लम्भिता**
**विभज्य सम्यग्विनियोगसत्क्रियाः।**
**फलन्त्युपायाः परिबृंहितायती-**
**रुपेत्य संघर्षमिवार्थसम्पदः।। १५।।**

**पदच्छेदः** - अनारतम्, तेन, पदेषु, लम्भिताः, विभज्य, सम्यक्, विनियोगसत्क्रियाः, फलन्ति, उपायाः, परिबृंहितायतीः, उपेत्य, सङ्घर्षम्, इव, अर्थसम्पदः।

**अन्वयः** - तेन पदेषु सम्यग् विभज्य लम्भिताः विनियोगसत्क्रियाः उपायाः सङ्घर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति।

**अर्थः।**

**तेन** - राज्ञा दुर्योधनेन। **पदेषु** - उपादेयवस्तुषु। **सम्यक्** - यथोचितम्। **विभज्य** - विभागं कृत्वा। **लम्भिताः** - यथास्थानं प्रयुक्ताः। **विनियोगसत्क्रियाः** - धनदानरूपसत्कारवन्तः। **उपायाः** - सामदानादयः। **सङ्घर्षम्** - परस्परस्पर्धाम्। **उपेत्य** - प्राप्य इव। **परिबृंहतायतीः** - परिवर्द्धितोत्तरकालाः। **अर्थसम्पदः** - धनसम्पत्तीः। **अनारतम्** - सततम्। **फलन्ति** - साधयन्ति

फल - निष्पत्तौ धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | फलति | फलतः | फलन्ति। |
| **म. पु.** | फलसि | फलथः | फलथ। |
| **उ. पु.** | फलामि | फलावः | फलामः। |

**विग्रहः/समासः।**

विनियोगसत्क्रियाः - विनियोगः एव सत्क्रिया येषां ते विनियोगसत्क्रियाः (बहु.)।

परिबृंहितायतीः - परिबृंहिता आयतिः यासां ताः परिबृंहितायतयः (बहु.) ताः परिबृंहितायतीः।

अर्थसम्पदः - अर्थाः एव सम्पदः अर्थसम्पदः (कर्म.), ताः अर्थसम्पदः।

अनारतम् - न आरतम् अनारतम् (नञ् तत्पु.)।

**अलङ्कारः** - उत्प्रेक्षा।

**सारः** - तेन दुर्योधनेन असङ्कीर्णं विविच्य स्थानेषु प्रापिताः विनियोगानुग्रहाः सामादयः परस्परस्पर्धा सम्प्राप्य प्रचितोत्तरकालाः अर्थसम्पत्तिः प्रभूतं प्रसुवते। तेन दुर्योधनेन स्थानोषु सम्यक् प्रयुक्तम् उपायचतुष्टयं सततं स्थिरसम्पत्तीरुत्पादयतीत्यर्थः।

**अनेकराजन्यरथाश्वसङ्कुलं**
**तदीयमास्थाननिकेतनाजिरम्।**
**नयत्ययुग्मच्छदगन्धिरार्द्रतां**
**भृशं नृपोपायनदन्तिनां मदः।। १६।।**

**पदच्छेदः** - अनेकराजन्यरथाश्वसङ्कुलम्, तदीयम्, आस्थाननिकेतनाजिरम्, नयति, अयुग्मच्छदगन्धिः, आर्द्रताम्, भृशम्, नृपोपायनदन्तिनाम्, मदः।

**अन्वयः** - अयुग्मच्छदगन्धिः नृपोपायनदन्तिनां मदः अनेकराजन्यरथाश्वसङ्कुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति।

**अर्थः।**

**अयुग्मच्छदगन्धिः** - सप्तपर्णपुष्पसुगन्धिः। **नृपोपायनदन्तिनाम्** - करदभूपोपहारीकृतहस्तिनाम्। **मदः** - दानवारि (मदजलम्)। **अनेकराजन्यरथाश्वसङ्कुलम्** - नानानरपतिवृन्दरथघोटकसङ्कीर्णम्। **तदीयम्** - दुर्योधनीयम्। **आस्थाननिकेतनाजिरम्** - सभामण्डपाङ्कणम्। **भृशम्** - अत्यर्थम् - अत्यधिकम्। **आर्द्रताम्** - पङ्किलत्वम्। **नयति** - प्रापयति।

णीच् - प्रापणे धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | नयति | नयतः | नयन्ति। |
| **म. पु.** | नयसि | नयथः | नयथ। |
| **उ. पु.** | नयामि | नयावः | नयामः। |

**विग्रहः/समासः।**

अनेकराजन्यरथाश्वसङ्कुलम् - राज्ञां समूहः राजन्यः वा राज्ञामपत्यानि पुमांसो राजन्यः (क्षत्रियाः), अनेके राजन्यः अनेकराजन्यः (कर्म), रथाश्च अश्वाश्च रथाश्वम् (समाहारद्वन्द्वः), अनेकराजन्यानां यद् रथाश्वं तद् अनेकराजन्यरथाश्वम् (बहु.), तेन सङ्कुलम् अनेकराजन्यरथाश्वसङ्कुलम् (तृ. तत्पु.), तत् अनेकराजन्यरथाश्वसङ्कुलम्।

आस्थाननिकेतनाजिरम् - आस्थानस्य निकेतनम् आस्थाननिकेतनम् (ष. तत्पु.), तस्य अजिरम् आस्थाननिकेतनाजिरम् (ष. तत्पु.), तत् आस्थाननिकेतनाजिरम्।

अयुग्मच्छदगन्धिः - न युग्मः अयुग्मः (नञ्), अयुग्मानि (विषमाणि) सप्त छदा (पत्राणि) यस्य सः अयुग्मच्छदः (बहु.) अयुग्मच्छदस्य गन्ध इव गन्धो यस्य सः अयुग्म-च्छदगन्धिः (बहु.)।

नृपोपायदन्तिनाम् - उपायनानि दन्तिनः उपायनदन्तिनः (कर्म.), नृपाणां ये उपायनदन्तिनः ते नृपोपायनदन्तिनः (बहु.), तेषां नृपोपायनदन्तिनाम्।

**कोशः।**

'सप्तपर्णो विशालत्वक् शारदो विषमच्छदः' इत्यमरः।

'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः।

'गण्डः कटो मदो दानम्' इत्यमरः।

'अङ्कणं चत्त्वराजिरे' इत्यमरः।

**अलङ्कारः** - उदात्तः। लक्षणम् - उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम्।

**सारः** - सप्तपर्णसुरभि राजोपहारहस्तिनां मदः बहुनृपस्यन्दनवाजिसङ्क्रान्तं दुर्योधनसम्बन्धि सभामण्डपाङ्कणं अत्यर्थं पङ्किलत्वं प्रापयति। स्ववशवर्तिनां करदानार्थमागतानां राज्ञां रथवाजिसमूहव्याप्तं दुर्योधनसभामण्डपाङ्कणं नृपोपहारभूतहस्तिमदजलेन नितरामार्द्रतां नीतमिति भावः।

**सुखेन लभ्या दधतः कृषीवलै-**
**रकृष्टपच्या इव सस्यसम्पदः।**
**वितन्वति क्षेममदेवमातृका-**
**श्चिराय तस्मिन् कुरवश्चकासति।। १७।।**

**पदच्छेदः** - सुखेन, लभ्याः, दधतः, कृषीवलैः, अकृष्टपच्याः, इव, सस्यसम्पदः, वितन्वति, क्षेमम्, अदेवमातृकाः, चिराय, तस्मिन्, कुरवः, चकासति।

**अन्वयः** - चिराय तस्मिन् क्षेमं वितन्वति (सति) अदेवमातृकाः कुरवः अकृष्टपच्याः इव कृषीवलैः सुखेन लभ्याः सस्यसम्पदः दधतः चकासति।

**अर्थः।**

**चिराय** - चिरकालम्। **तस्मिन्** - दुर्योधने। **क्षेमम्** - कुशलम् (मङ्गलम्)। **वितन्वति (सति)** - कुर्वति सति। प्रजानां सुखार्थं यत्र तत्र क्षेत्रसमीपे कूपप्रणालिका प्रभृतिजलवहविधिं वाधातरि दुर्योधने इत्यर्थः। **अदेवमातृकाः** - नदीमातृकाः। देवमातृकास्ते देशा येषु वृष्ण्या अन्नानि जायन्ते, तद्भिन्नास्तु नदीमातृकाः प्रोच्यते। **कुरवः** - कुरुजनपदविशेषाः। **अकृष्टपच्याः** - अकर्षणसिद्धाः इव। (स्वयमेव पच्यमाना इव)। **कृषीवलैः** - कर्षकैः। **सुखेन** - अनायासेन। **लभ्याः** - प्राप्याः। **सस्यसम्पदः** - धान्यसम्पत्तीः। **दधतः** - धारयन्तः। **चकासति** - शोभन्ते (विराजन्ते)।

चकासृ - दीप्तौ धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | चकास्ति | चकासतः | चकासति। |
| **म. पु.** | चकास्सि | चकास्थः | चकास्थ। |
| **उ. पु.** | चकास्मि | चकास्वः | चकास्मः। |

**विग्रहः/समासः।**

अदेवमातृकाः - देव एव माता येषां ते देवमातृकाः (बहु.), न देवमातृकाः अदेवमातृकाः (नञ् तत्पु.)।

कृषीवलैः - कृषिः अस्ति येषां ते कृषीवलाः (बहु.), तैः कृषीवलैः।

अकृष्टपच्याः - कृष्टेन पच्यते इति कृष्टपच्याः (उपपदसमासः), न कृष्टपच्याः अकृष्टपच्याः (नञ् तत्पु.)।

सस्यसम्पदः - सस्यानां सम्पदः सस्यसम्पदः (ष. तत्पु.)।

**कोशः।**

'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः।

'क्षेत्राजीवः कर्यकश्च कृषकश्च कृषीवलः' इत्यमरः।

'वृक्षादीनां फलं सस्यम्' इत्यमरः।

**अलङ्कारः** - उत्प्रेक्षा।

**सारः** - चिरकालपर्यन्तं दुर्योधने क्षेमं वितन्वति सति नदीपालितः कुरुदेशः हलाद्यचालितक्षेत्रोद्भूता इव क्षेत्रपतिभिः अनायासेन लभ्याः वृक्षफलानि धारयन्तः दीप्यन्ते।

**उदारकीर्तेरुदयं दयावतः**
**प्रशान्तबाधं दिशतोऽभिरक्षया।**
**स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता**
**वसूपमानस्य वसूनि मेदिनी।। १८।।**

**पदच्छेदः** - उदारकीर्तेः, उदयम्, दयावतः, प्रशान्तबाधम्, दिशतः, अभिरक्षया, स्वयम्, प्रदुग्धे, अस्य, गुणैः, उपस्नुता, वसूपमानस्य, वसूनि, मेदिनी।

**अन्वयः** - उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुता मेदिनी स्वयं वसूनि प्रदुग्धे।

**अर्थः।**

**उदारकीर्तेः** - महायशसः। **दयावतः** - करुणान्वितस्य। **अभिरक्षया** - सर्वथा रक्षणेन। **प्रशान्तबाधम्** - निरुपद्रवम्। **उदयम्** - उन्नतिम्। **दिशतः** - सम्पादयतः। **वसूपमानस्य** - कुबेरोपमस्य। **अस्य** - दुर्योधनस्य। **गुणैः** - औदार्यगाम्भीर्यशौर्यादिभिः। **उपस्नुता** - द्राविता। **मेदिनी** - वसुन्धरा (पृथिवी)। **स्वयम्** - आत्मनैव। **वसूनि** - धनानि। **प्रदुग्धे** - सुखेन दुह्यते। प्र उपसर्गपूर्वक दुह - प्रपूरणे धातोः लट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | प्रदुग्धे | प्रदुहाते | प्रदुहते। |
| **म. पु.** | प्रधुक्षे | प्रदुहाथे | प्रधुग्ध्वे। |
| **उ. पु.** | प्रदुहे | प्रदुह्वहे | प्रदुह्महे। |

**विग्रहः/समासः।**

उदारकीर्तेः - उदारा कीर्तिः यस्य सः उदारकीर्तिः (बहु.), तस्य उदारकीर्तेः।

दयावतः - दया अस्य अस्ति इति दयावान् (दया + मतुप्), तस्य दयावतः।

अभिरक्षया - अभितः रक्षा अभिरक्षा (प्रादिसमासः), तया अभिरक्षया।

प्रशान्तबाधम् - प्रकर्षेण शान्ता प्रशान्ता (प्रादिसमासः), प्रशान्ता बाधा यस्मिन् सः प्रशान्तबाधः (बहु.), तं प्रशान्तबाधम्।

वसूपमानस्य - वसति अनेन इति वसु (कर्म.), वसुः उपमानं यस्य सः वसूपमानः (बहु.), तस्य वसूपमानस्य।

**कोशः।**

'दया कृपा अनुकम्पा स्यात्' इत्यमरः।

'उदारो दातृ महतोः' इत्यमरः।

**अलङ्कारः** - समासोक्ति। लक्षणम् - समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।

**सारः** - उत्कृष्टयशस्विनः कारुण्यशालिनः निरुपद्रवं यथा स्यात्तथा सर्वतस्त्राणेन उत्कर्षं सम्पादयतः कुबेरतुल्यस्य अस्य दयादाक्षिण्यादिभिः द्राविता पृथ्वी धनानि स्वयं प्रदुग्धे। केनचित् चतुरेण नवप्रसूता रक्षिता च गौः अक्लेशेन यथा दुह्यते तथा दुर्योधनेन रक्षिता भूरपि अश्रमेण वसु दुह्यत इति भावः।

**महौजसो मानधना धनार्चिताः**

**धनुर्भृतः संयति लब्धकीर्तयः।**

**नसंहतास्तस्य नभिन्नवृत्तयः**

**प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्।। १९।।**

**पदच्छेदः** - महौजसः, मानधनाः, धनार्चिताः, धनुर्भृतः, संयति, लब्धकीर्तयः, संहताः, तस्य, न, भिन्नवृत्तयः, प्रियाणि, वाञ्छन्ति, असुभिः, समीहितुम्।

**अन्वयः** - महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः धनुर्भृतः न संहताः, न भिन्नवृत्तयः (अपि तु) असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति।

**अर्थः।**

**महौजसः** - अतितेजस्विनः। **मानधनाः** - मनस्विनः। **धनार्चिताः** - धनसत्कृताः। **संयति** - युद्धे। **लब्धकीर्तयः** - प्राप्तयशसः (वीरभटाः इत्यर्थः)। **धनुर्भृतः** - धनुर्धराः। **न संहताः** - मिथः स्वार्थसिद्ध्यै न मिलिताः। **न भिन्नवृत्तयः** - न पृथग्व्यापाराः। **असुभिः** - प्राणैः। **तस्य** - दुर्योधनस्य। **प्रियाणि** - शुभानि। **समीहितुम्** - विधातुम्। **वाञ्छन्ति** - इच्छन्ति। वाछि - इच्छायां धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | वाञ्छति | वाञ्छतः | वाञ्छन्ति। |
| **म. पु.** | वाञ्छसि | वाञ्छथः | वाञ्छथ। |
| **उ. पु.** | वाञ्छामि | वाञ्छावः | वाञ्छामः। |

**विग्रहः/समासः।**

महौजसः - महत् ओजो येषां ते महौजसः (बहु.)।

मानधनाः - मान एव धनं येषां ते मानधनाः (बहु.)।

धनार्चिताः - धनैः अर्चिताः धनार्चिताः (तृ. तत्पु.)।

लब्धकीर्तयः - लब्धा कीर्तिः यैः ते लब्धकीर्तयः (बहु.)।

धनुर्भृतः - धनूंषि बिभ्रतीति धनुर्भृतः (उपपदसमासः)।

नसंहताः - न संहताः भवन्ति इति नसंहताः (सुप्सुपा)

नभिन्नवृत्तयः - भिन्ना वृत्तिः येषां ते भिन्नवृत्तयः (बहु.), न भिन्नवृत्तयः नभिन्नवृत्तयः (सुप्सुपा)।

केचित्तु न शब्देन समासं नाभिप्रयन्ति।

**अलङ्कारः** - संसृष्टिः। मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते।

**सारः** - अतिबलिनः कुलशीलाद्यभिमानसर्वस्वाः धनसत्कृताः सङ्ग्रामे प्राप्तयशसः अस्वार्थिनः एकव्यापाराः राजानः तस्य दुर्योधनस्य प्राणैः प्रियाणि कर्तुम् अभिलषन्ति। अनेकवीरसहायभूतस्य दुर्योधनस्य न अभिभवसंभावनेति भावः।

**महीभृतां सच्चरितैश्चरैः क्रिया**

**स वेद निश्शेषमशेषितक्रियः।**

**महोदयैस्तस्य हितानुबन्धिभिः**

**प्रतीयते धातुरिवेहितं फलैः।। २०।।**

**पदच्छेदः** - महीभृताम्, सच्चरितैः, चरैः, क्रिया, सः, वेद, निःशेषम्, अशेषितक्रियः, महोदयैः, तस्य, हितानुबन्धिभिः,

प्रतीयते, धातुः, इव, ईहितम्, फलैः।

**अन्वयः** - अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद। हितानुबन्धिभिः महोदयैः धातुः ईहितम् इव तस्य (ईहितम्) फलैः प्रतीयते।

**अर्थः।**

**अशेषितक्रियः** - समापितसकलकार्यः। **सः** - दुर्योधनः। **सच्चरितैः** - सत्यशीलैः। **चरैः** - गुप्तचरैः। **महीभृतां** - भूपतीनाम्। **क्रियाः** - सकलव्यापारान्। **निःशेषं** - अशेषम्। **वेद** - जानाति। **हितानुबन्धिभिः** - हितकारिभिः। **महोदयैः** - महानुभावैः। **धातुः** - ईश्वरस्य। **ईहितम्** - चेष्टितम्। **तस्य** - दुर्योधनस्य। **(ईहितम्)** - ईप्सितम्। **फलैः** - प्रयोजनैः - परिणामैः। **प्रतीयते** - ज्ञायते।

विद - ज्ञाने धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | वेद | विदतुः | विदुः। |
| **म. पु.** | वेत्थ | विदथुः | विद। |
| **उ. पु.** | वेद | विद्वः | विद्मः। |

प्रति उपसर्गपूर्व क इण् - गतौ धातोः लट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | प्रतीयते | प्रतीयेते | प्रतीयन्ते। |
| **म. पु.** | प्रतीयसे | प्रतीयेथे | प्रतीयध्वे। |
| **उ. पु.** | प्रतीये | प्रतीयावहे | प्रतीयामहे। |

**विग्रहः/समासः।**

अशेषितक्रियः - न शेषिता अशेषिता (नञ्), अशेषिता क्रिया येन सः अशेषितक्रियः (बहु.)।

महीभृताम् - महीं बिभ्रतीति महीभृतः (उपपदसमासः), तेषां महीभृताम्।

सच्चरितैः - सत् (शुभं) चरितं येषां ते सच्चरिताः (बहु.), तैः सच्चरितैः।

हितानुबन्धिभिः - हितम् अनुबध्नन्ति इति हितानुबन्धिनः (उपपद), तैः हितानुबन्धिभिः।

महोदयैः - महान् उदयो येषां ते महोदयाः (बहु.), तैः महोदयैः।

निः शेषम् - निर्गतः शेषः यस्मात् तद् निः शेषम् (बहु.)।

धातुः - दधाति विश्वमिति धाता (कृत्), तस्य धातुः।

क्रियाः - क्रियते अनया असौ अस्यां वा (कृत्)।

फलैः - फलतीति फलः (कृत्), तैः फलैः।

**अलङ्कारः** - उपमा। लक्षणम् - उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।

**सारः** - अनवशिष्टकार्यः सः दुर्योधनः साधुकार्यकारिभिः चरैः राज्ञां समग्रं यथा स्यात्तथा कार्याणि जानाति। तस्य दुर्योधनस्य तिङ्कृत्प्रत्ययप्रकृतिरिव चेष्टितं प्रभूतवृद्धिभिः प्रियानुरोधिभिः कार्यनिष्पत्तिभिः ज्ञायते। उत्कृष्टकार्यसाधकचरद्वारा सकलमहीपतिसर्वव्यापारं जानतो दुर्योधनस्योद्योगः तत्सिद्ध्युत्तरमेव ज्ञायते लोकैः न तु ततः प्रागित्यर्थः।

**न तेन सज्यं क्वचिदुद्यतं धनुः**
**कृतं न वा कोपविजिह्ममाननम्।**

**गुणानुरागेण शिरोभिरुह्यते**

**नराधिपैर्माल्यमिवास्य शासनम्।। २१।।**

**पदच्छेदः** - न, तेन, सज्यम्, क्वचित्, उद्यतम्, धनुः, कृतम्, न, वा, कोपविजिह्मम्, आननम्, गुणानुरागेण, शिरोभिः, उह्यते, नराधिपैः, माल्यम्, इव, अस्य, शासनम्।

**अन्वयः** - तेन क्वचित् सज्यं धनुः न उद्यतम्, वा कोपविजिह्मम् आननं न कृतम्, गुणानुरागेण नराधिपैः अस्य शासनं माल्यमिव शिरोभिः उह्यते।

**अर्थः।**

**तेन** - दुर्योधनेन। **क्वचित्** - कुत्रापि। **सज्यम्** - समौर्वीकम्। **धनुः** - कार्मुकम्। **न उद्यतम्** - नोत्तालितम्। **वा** - तथा च। **कोपविजिह्मम्** - क्रोधकुटिलम्। **आननम्** - मुखम्। **न कृतम्** - न विहितम्। **गुणानुरागेण** - दयादाक्षिण्यादिस्नेहेन। **नराधिपैः** - भूपतिभिः। **अस्य** - दुर्योधनस्य। **शासनम्** - आदेशवचः - आज्ञा। **माल्यम्** - पुष्पमाला। **इव** - इव। **शिरोभिः** - शीर्षैः। **उह्यते** - धार्यते।

वह् - प्रापणे धातोः कर्मणि लट् रूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | उह्यते | उह्येते | उह्यन्ते। |
| **म. पु.** | उह्यसे | उह्येथे | उह्यध्वे। |
| **उ. पु.** | उह्ये | उह्यावहे | उह्यामहे। |

**विग्रहः/समासः।**

सज्यम् - ज्यया सहितम् सज्यम् (बहु.)। ('तेन सहेति तुल्ययोगे' इति सूत्रेण तुल्याय बहु.)।

कोपविजिह्मम् - विशेषेण जिह्मम् विजिह्मम्, कोपेन विजिह्मम् कोपविजिह्मम् (तृ. तत्पु.)।

गुणानुरागेण - गुणेषु अनुरागः गुणानुरागः (स. तत्पु.), तेन गुणानुरागेण।

नराधिपैः - अधि पान्तीति अधिपाः (कृत्), नराणाम् अधिपाः नराधिपाः (ष.तत्पु.), तैः नरैधिपैः।

शासनम् - शिष्यते इति शासनम् (कृत्)।

**कोशः।**

'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः।

'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इत्यमरः।

'कोपक्रोधामर्षरोषप्रतिघा रुट् क्रुधौ स्त्रियौ' इत्यमरः।

'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः।

**अलङ्कारः** - उपमा।

**सारः** - तेन दुर्योधनेन समौर्वीकं शरासनं नोत्थापितम्। अथवा मुखं क्रोधकुटिलं न विहितम्। दयादाक्षिण्यादिगुणस्नेहेन अस्य दुर्योधनस्य आदेशः नृपतिभिः स्रगिव उत्तमाङ्गैः धार्यते। यद्यपि असौ दुर्योधनः धनुर्न गृह्णाति, नापि क्रुद्ध्यति तथापि तदनुमतिं माल्यमिव नृपाः शिरसा वहन्तीत्यर्थः।

**स यौवराज्ये नवयौवनोद्धतं**

**निधाय दुःशासनमिद्धशासनः।**

**मखेष्वखिन्नोऽनुमतः पुरोधसा**

**धिनोति हव्येन हिरण्यरेतसम्।। २२।।**

**पदच्छेदः** - सः, यौवराज्ये, नवयौवनोद्धतम्, निधाय, दुःशासनम्, इद्धशासनः, मखेषु, अखिन्नः, अनुमतः, पुरोधसा, धिनोति, हव्येन, हिरण्यरेतसम्।

**अन्वयः** - इद्धशासनः सः यौवराज्ये नवयौवनोद्धतं दुःशासनं निधाय मखेषु अखिन्नः पुरोधसा अनुमतः (सन्) हव्येन हिरण्यरेतसं धिनोति।

**अर्थः।**

**इद्धशासनः** - उग्राज्ञाकरः। **सः** - दुर्योधनः। **यौवराज्ये** - युवराजाधिकारे। **नवयौवनोद्धतम्** - अभिनवतारुण्यप्रगल्भम्। **दुःशासनम्** - स्वानुजम्। **निधाय** - निवेश्य (संस्थाप्य)। **मखेषु** - यज्ञेषु। **अखिन्नः** - अदीनः (प्रसन्नः)। **पुरोधसा** - पुरोहितेन। **अनुमतः (सन्)** - अनुज्ञातः सन्। **हव्येन** - हविषा (घृत-यव-तिल)। **हिरण्यरेतसम्** - अग्निम्। **धिनोति** - प्रीणयति।

धिवि - प्रीणनार्थे धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | धिनोति | धिनुतः | धिन्वन्ति। |
| **म. पु.** | धिनोषि | धिनुथः | धिनुथ। |
| **उ. पु.** | धिनोमि | धिनुवः/धिन्वः | धिनुमः/धिन्मः। |

**विग्रहः/समासः।**

इद्धशासनः - इद्धं शासनं यस्य सः इद्धशासनः (बहु.)।

यौवराज्ये - युवा च असौ राजा च युवराजः (कर्म.), युवराजस्य कर्म यौवराज्यम् (कर्म.), तस्मिन् यौवराज्ये।

नवयौवनोद्धतम् - यूनो भावः यौवनम् (कर्म.), नवं यौवनं नवयौवनम् (सुप्सुपा), नवयौवनेन उद्धतः नवयौवनोद्धतः (तृ. तत्पु.), तं नवयौवनोद्धतम्।

दुःशासनम् - दुःखेन शास्यते इति दुःशासनः, तं दुःशासनम्।

अखिन्नः - न खिन्नः अखिन्नः (नञ्. तत्पु.)।

हिरण्यरेतसम् - हिरण्यं (सुवर्णं) रेतो यस्य सः हिरण्यरेताः (बहु.), तं हिरण्यरेतसम्।

**कोशः।**

'जनको युवराजस्तु कुमारो भर्तृदारकः' इत्यमरः।

'पुरोधास्तु पुरोहितः' इत्यमरः।

'हिरण्यरेतो हुतभुग्दहनो हव्यवाहनः' इत्यमरः।

**अलङ्कारः** - अनुप्रासः।

**सारः** - स्वीकृतादेशः सः दुर्योधनः नूतनतारुण्यघृष्टं दुःशासनं युवराजकर्मणि संस्थाप्य पुरोहितेन आज्ञप्तः सन् क्रतुषु हविषा अग्निं प्रीणयति। कनिष्ठसोदरं दुःशासनं युवराजं सम्पाद्य हितादेशमादाय दुर्योधनः यज्ञेष्वनलसः सन् वह्निं जुहोतीत्यर्थः। एवं धर्मं चरतः तस्य अनिष्टप्रसङ्गः नास्तीत्यर्थः।

**प्रलीनभूपालमपि स्थिरायति**

**प्रशासदावारिधि मण्डलं भुवः।**

**स चिन्तयत्येव भियस्त्वदेष्यती-**

**रहो दुरन्ता बलवद्विरोधिता।। २३।।**

**पदच्छेदः** - प्रलीनभूपालम्, अपि, स्थिरायति, प्रशासत्, आवारिधि, मण्डलम्, भुवः, सः, चिन्तयति, एव, भियः, त्वदेष्यतीः, अहो, दुरन्ता, बलवद्विरोधिता।

**अन्वयः** - सः प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलं प्रशासत् अपि त्वदेष्यतीः भियः चिन्तयति एव। अहो बलवद्विरोधिता दुरन्ता (भवति)।

**अर्थः।**

**सः** - दुर्योधनः। **प्रलीनभूपालम्** - अप्रतिमभूपम् (अकण्टकम्)। **स्थिरायति** - चिरस्थायि (सदावर्तमानम्)। **आवारिधि** - आसमुद्रम् (समुद्रपर्यन्तम्)। **भुवः** - पृथिव्याः। **मण्डलम्** - वलयम्। **प्रशासत् अपि** - आज्ञापयन्नपि। **त्वदेष्यतीः** - त्वदागमिष्यतीः। **भियः** - भयहेतून्। **चिन्तयति एव** - आलोचयति एव। **अहो** - अहो इति सखेदोच्छ्वासे। **बलवद्विरोधिता** - महाजनवैरिता। **दुरन्ता** - दुरवसाना (दुःखपरिणामा)। **(भवति)** - भवतीति शेषः।

चिति - स्मृत्याम् धातोः णिचि लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | चिन्तयति | चिन्तयतः | चिन्तयन्ति। |
| **म. पु.** | चिन्तयसि | चिन्तयथः | चिन्तयथ। |
| **उ. पु.** | चिन्तयामि | चिन्तयावः | चिन्तयामः। |

**विग्रहः/समासः।**

प्रलीनभूपालम् - भुवं पालयतीति भूपालः (कृत्), प्रलीनाः भूपालाः यस्मिन् तत् प्रलीनभूपालम् (बहु.) तत् प्रलीनभूपालम्।

स्थिरायति - स्थिरा आयतिः (उत्तरकालः) यस्य तत् स्थिरायति (बहु.)।

आवारिधि - वारि धीयते अस्मिन् इति वारिधिः (कृत्), आवारिधिभ्यः आवारिधि (अव्ययीभावसमासः)। आङ्मर्यादाऽभिविध्योः इत्यव्ययीभावः।

मण्डलम् - मण्डयति (भूषयति) इति मण्डलम् (कृत्)।

बलवद्विरोधिता - बलते (विपक्षान्) हन्तीति बलम् (कृत्), बलमस्यास्तीति बलवान् (मतुप् प्रत्ययः), विरुणद्धि इति विरोधी (कृत्), तस्य भावः विरोधिता (कर्म), बलवता विरोधिता बलवद्विरोधिता (सुप्सुपासमासः)। योगविभागात् (बलवता विरोधिता) (तृ. तत्पु.)।

त्वदेष्यतीः - त्वत् एष्यतीः त्वदेष्यतीः (सुप्सुपा) (प. तत्पु.)।

**कोशः।**

'उत्तरः काल आयतिः' इत्यमरः।

'भीतिर्भीः साध्वसं भयम्' इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**सारः** - स दुर्योधनः विनष्टनृपं सुस्थिरं पृथिव्याः खण्डं समुद्रपर्यन्तं आज्ञापयन्नपि त्वत्त आगमिष्यतीः विपदः चिन्तयन्त्येव। अहो! पराक्रमिशत्रुता दुष्टपरिणामा भवतीति शेषः। निश्शत्रुजलधिपर्यन्तभूखण्डपालकस्यापि दुर्योधनस्य त्वत्तो भयं भवत्येव। यतः प्रबलशत्रुभिर्विरोधो अनिष्टमुत्पादयतीत्यर्थः।

**कथाप्रसङ्गेन जनैरुदाहृता-**

**दनुस्मृताखण्डलसूनुविक्रमः।**

**तवाभिधानाद्व्यथते नताननः**

**स दुःसहान्मन्त्रपदादिवोरगः।। २४।।**

**पदच्छेदः** - कथाप्रसङ्गेन, जनैः, उदाहृतात्, अनुस्मृताखण्डलसूनुविक्रमः, तव, अभिधानात्, व्यथते, नताननः, सः, दुःसहात्, मन्त्रपदात्, इव, उरगः।

**अन्वयः** - कथाप्रसङ्गेन जनैः उदाहृतात् तव अभिधानात् अनुस्मृताखण्डलसूनुविक्रमः नताननः सः दुःसहात् मन्त्रपदात् उरगः इव व्यथते।

**अर्थः।**

दुर्योधनपक्षे - **कथाप्रसङ्गेन** - वार्ताऽनुक्रमेण (कथानुबन्धेन)। **जनैः** - लोकैः। **उदाहृतात्** - उच्चारितात्। **तव** - भवतः (युधिष्ठिरस्य)। **अभिधानात्** - नामधेयात्। **अनुस्मृताखण्डलसूनुविक्रमः** - स्मृतमहेन्द्रसुतार्जुनपराक्रमः। **नताननः** - नम्रमुखः। **सः** - दुर्योधनः। **दुःसहात्** - नितरां सोढुमशक्यात्। **मन्त्रपदात्** - विषदूरीकरणवाक्यविशेषात्। **उरगः** - सर्पः। **इव** - इव। **व्यथते** - दुखायते।

सर्पपक्षे - **कथाप्रसङ्गेन जनैः** - विषवैद्यप्रवरलोकैः। **उदाहृतात्** - उच्चारितात्। **तवाभिधानात्** - तार्क्ष्यवासुक्यादिनामयुक्तात्। **अनुस्मृताखण्डलसूनुविक्रमः** - अनुस्मृतविष्णुवाहनगरुडपराक्रमः। **नताननः** - अधोमुखः। **मन्त्रपदात्** - मन्त्रगतशब्दात्। **व्यथते** - क्लिश्यति।

व्यथ - भवयसञ्चलनयोः धातोः लट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | व्यथते | व्यथेते | व्यथन्ते। |
| **म. पु.** | व्यथसे | व्यथेथे | व्यथध्वे। |
| **उ. पु.** | व्यथे | व्यथावहे | व्यथामहे। |

**विग्रहः/समासः।**

कथाप्रसङ्गेन - कथायाः प्रसङ्गः कथाप्रसङ्गः (ष. तत्पु.), तेन कथाप्रसङ्गेन।

अनुस्मृताखण्डलसूनुविक्रमः - आखण्डलस्य सूनुः आखण्डलसूनुः (ष. तत्पु.), तस्य विक्रमः आखण्डलसूनुविक्रमः (ष. तत्पु.), अनुस्मृतः आखण्डलसूनुविक्रमः येन सः अनुस्मृताखण्डलसूनुविक्रमः (बहु.)।

उरगपक्षे - आखण्डलस्य सूनुः - (अनुजः) आखण्डलसूनुः।

तवाभिधानात् - तश्च वश्च तवौ (द्वन्द्वः), तवयोः अभिधानं तवाभिधानम् (ष. तत्पु.), तस्मात् तवाभिधानात्।

नताननः - नतम् आननं यस्य सः नताननः (बहु.)।

मन्त्रपदात् - मन्त्रस्य पदं मन्त्रपदम् (ष. तत्पु.), तस्मात् मन्त्रपदात्।

दुःसहात् - दुःखेन सह्यते इति दुःसहः (कृत्), तस्मात् दुःसहात्।

**कोशः।**

'सूनुः पुत्रेऽनुजे रवौ' इति विश्वः।

'कथाप्रसङ्गो वार्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः।

**अलङ्कारः** - श्लेषालङ्कारानुप्राणिता उपमा।

**सारः** - परस्परालापप्रसङ्गेन तत्रत्यैः कथितात् भवतः नामधेयात् अनुचिन्तितार्जुनपराक्रमः सन् स दुर्योधनः आलापप्रसक्त्या विषवैद्यैः उक्तात् 'तवा'भिधानात् - तार्क्ष्यवासुकिनाम्नः (त - तार्क्ष्यः - गरुडः, वा - वासुकिः) सहनायोग्यात् मन्त्रशब्दात् स्मृतगरुडपादविक्षेपः सन् भेगीव नम्रमुखः सन् क्लिश्यति। विशवैद्योच्चारिततार्क्ष्यवासुकिनामाङ्कितमन्त्रमाकर्ण्य तत्पदविक्षेपं संस्मरन्नुरगो यथा क्लिश्यति तथा लोकोक्तत्वन्नामाकर्ण्य अर्जुनपराक्रमं स्मरन् दुर्योधनः क्लिश्यतीत्यर्थः।

**तदाशु कर्तुं त्वयि जिह्ममुद्यते**
**विधीयतां तत्र विधेयमुत्तरम्।**
**परप्रणीतानि वचांसि चिन्वतां**
**प्रवृत्तिसाराः खलु मादृशां गिरः।। २५।।**

**पदच्छेदः** - तत्, आशु, कर्तुम्, त्वयि, जिह्मम्, उद्यते, विधीयताम्, तत्र, विधेयम्, उत्तरम्, परप्रणीतानि, वचांसि, चिन्वताम्, प्रवृत्तिसाराः, खलु, मादृशाम्, गिरः।

**अन्वयः** - तत् त्वयि जिह्मं कर्तुम् उद्यते, तत्र विधेयम् उत्तरम् आशु विधीयताम्। परप्रणीतानि वचांसि चिन्वताम्, मादृशां गिरः प्रवृत्तिसाराः खलु।

**अर्थः।**

**तत्** - तस्मात् कारणात्। **त्वयि** - भवति (धर्मराजे) भवत अर्थे इत्यर्थः। **जिह्मम्** - कपटम्। **कर्तुम्** - विधातुम्। **उद्यते** - उद्युक्ते (प्रवृत्ते)। **तत्र** - तस्मिन् (दुर्योधने)। **विधेयम्** - कर्तव्यम्। **उत्तरम्** - प्रतीकारः। **आशु** - शीघ्रम्। **विधीयताम्** - क्रियताम्। (अर्थात् धर्मयुक्त्या भवन्तं जेतुमक्षमाः कपटयुक्त्या जिगीषति)। **परप्रणीतानि** - परैरुक्तानि। **वचांसि** - वाक्यानि। **चिन्वताम्** - गवेषयताम्। **मादृशाम्** - वनेचराणाम्। **गिरः** - वाचः। **प्रवृत्तिसाराः** - वृत्तान्तमात्रसाराः। **खलु** - एव।

वि उपसर्गपूर्वक धीङ् - आधारे धातोः लोट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | विधीयताम् | विधीयेताम् | विधीयन्ताम्। |
| **म. पु.** | विधीयस्व | विधीयेथाम् | विधीयध्वम्। |
| **उ. पु.** | विधीयै | विधीयावहै | विधीयामहै। |

चिञ् - चयने धातोः लोट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | चिनुतां | चिन्वाताम् | चिन्वताम्। |
| **म. पु.** | चिनुष्व | चिन्वाथाम् | चिनुध्वम्। |
| **उ. पु.** | चिनवै | चिनवावहै | चिनवामहै। |

**विग्रहः/समासः।**

आशु - अश्नुते इति आशु (कृत्)।

उत्तरम् - अतिशयेन उद्गतम् उत्तरम् (तरप्)।

परप्रणीतानि - प्रणीयते इति प्रणीतम् (प्र + णी + क्त - कृत्) परैः प्रणीतानि परप्रणीतानि (तृ. तत्पु.)।

प्रवृत्तिसाराः - प्रवर्तते इति प्रवृत्तिः (प्र + वृत् + क्तिन् - कृत्) प्रवृत्तिः सारो यासां ताः प्रवृत्तिसाराः (बहु.)।

**कोशः।**

'प्रतिवाक्योत्तरे समे' इत्यमरः।

'गीर्वाग्वाणी सरस्वती' इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**सारः** - परोक्तानि वचांसि अनुसन्दधताम् अस्मद्विधानां वाचः वार्तामात्रसारा भवन्ति खलु। तस्मात् भवति कपटं विधातुम् उद्युक्ते दुर्योधने कर्तव्यं प्रतीकारः शीघ्रं क्रियताम् इत्यर्थः। मादृशाः अल्पबुद्धयः वार्तामात्राभिज्ञाः भवन्ति न तु तदतिरिक्तकार्यानभिज्ञाः। अतः भवतैव विचार्य कर्तव्यमिति भावः।

**इतीरयित्वा गिरमात्तसत्क्रिये**
**गतेऽथ पत्यौ वनसन्निवासिनाम्।**
**प्रविश्य कृष्णासदनं महीभुजा**
**तदाचचक्षेऽनुजसन्निधौ वचः।। २६।।**

**पदच्छेदः** - इति, ईरयित्वा, गिरम्, आत्तसत्क्रिये, गते, अथ, पत्यौ, वनसन्निवासिनाम्, प्रविश्य, कृष्णासदनम्, महीभुजा, तत्, आचचक्षे, अनुजसन्निधौ, वचः।

**अन्वयः** - अथ वनसन्निवासिनां पत्यौ इति गिरम् ईरयित्वा आत्तसत्क्रिये गते (सति) महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधौ तत् वचः आचचक्षे।

**अर्थः।**

**अथ** - अनन्तरम्। **वनसन्निवासिनाम्** - वनेचराणाम्। **पत्यौ** - स्वामिनि (भर्तरि)। **इति गिरम्** - वचनम्। **ईरयित्वा** - उक्त्वा (निवेद्य)। **आत्तसत्क्रिये** - गृहीतपारितोषिके। **गते** - प्रयाते सति। **महीभुजा** - भूपतिना (युधिष्ठिरेण)। **कृष्णासदनम्** - द्रौपदीभवनम्। **प्रविश्य** - अन्तर्गत्वा। **अनुजसन्निधौ** - भीमसमक्षे। **तत्** - वनेचरोक्तम्। **वचः** - वचनम्। **आचचक्षे** - ऊचे।

आङ् उपसर्गपूर्वक चक्षिङ् - व्यक्तायां वाचि धातोः लिट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | आचचक्षे | आचचक्षाते | आचचक्षिरे। |
| **म. पु.** | आचचक्षिषे | आचचक्षाथे | आचचक्षिध्वे। |
| **उ. पु.** | आचचक्षे | आचचक्षिवहे | आचचक्षिमहे। |

**विग्रहः/समासः।**

वनसन्निवासिनाम् - वने सन्निवसन्ति ये ते वनसन्निवासिनः (बहु.), तेषां वनसन्निवासिनाम्।

आत्तसत्क्रिये - आत्ता (गृहीता) सत्क्रिया येन सः आत्तसत्क्रियः (बहु.), तस्मिन् आत्तसत्क्रिये।

महीभुजा - महीं भुनक्तीति महीभुक् (उपपद), तेन महीभुजा।

कृष्णासदनम् - कृष्णायाः सदनं कृष्णासदनम् (ष. तत्पु.)।

अनुजसन्निधौ - अनुजस्य सन्निधिः अनुजसन्निधिः (ष. तत्पु.), तस्मिन् अनुजसन्निधौ।

**कोशः।**

'अटव्यारण्यं विपिनं गहनं काननं वनम्' इत्यमरः।

'धवः पतिः प्रियो भर्ता' इत्यमरः।

'सन्निधिः सन्निकर्षणम्' इत्यमरः।

**सारः** - प्राप्तपारितोषिकात्मसत्कारे वनौकसां स्वामिनि उक्तप्रकारां वाचम् उक्त्वा स्वगृहं प्राप्ते सति राज्ञा युधिष्ठिरेण द्रौपदीभवनमागत्य अवरजान्तिके वनेचरोक्तं वचनम् ऊचे।

**निशम्य सिद्धिं द्विषतामपाकृती-**
**स्ततस्ततस्त्या विनियन्तुमक्षमा।**
**नृपस्य मन्युव्यवसायदीपिनी-**
**रुदाजहार द्रुपदात्मजा गिरः।। २७।।**

**पदच्छेदः** - निशम्य, सिद्धिम्, द्विषताम्, अपाकृतीः, ततः, ततस्त्याः, विनियन्तुम्, अक्षमा, नृपस्य, मन्युव्यवसायदीपिनीः, उदाजहार, द्रुपदात्मजा, गिरः।

**अन्वयः** - ततः द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा (सती) नृपस्य मनुव्यवसायदीपिनीः गिरः उदाजहार।

**अर्थः।**

**ततः** - युधिष्ठिरकथनानन्तरम्। **द्रुपदात्मजा** - द्रौपदी। **द्विषताम्** - शत्रूणाम्। **सिद्धिम्** - सफलताम् (तदिष्टसिद्धिम्)। **निशम्य** - श्रुत्वा। **ततस्त्याः** - ततः आगताः (शत्रुसमुत्थाः)। **अपाकृतीः** - अपकारान्। **विनियन्तुम्** - निरोद्धुम्। **अक्षमा सती** - असमर्था सती। **नृपस्य** - राज्ञः (युधिष्ठिरस्य)। **मन्युव्यवसायजीपिनीः** - क्रोधोद्योगोद्द्योतिनीः। **गिरः** - वचः। **उदाजहार** - उदाजहिरे (यथा प्रकृत्या शान्तचित्तस्य युधिष्ठिरस्य हृदये शत्रुप्रतीकारकरणार्थं बुद्धिरुत्तेजिता भवति, तथा जगाद इत्यर्थः)।

उत्, आङ् इत्युपसर्गद्वयपूर्वक हृञ् - हरणे धातोः लिट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | उदाजहार | उदाजह्रतुः | उदाजह्रुः। |
| **म. पु.** | उदाजहर्थ | उदाजह्रथुः | उदाजह्र। |
| **उ. पु.** | उदाजहार/उदाजहर | उदाजह्रिव | उदाजह्रिम। |

**विग्रहः/समासः।**

द्रुपदात्मजा - द्रुपदस्य आत्मजा द्रुपदात्मजा (ष.तत्पु.)।

अक्षमा - क्षमते इति क्षमा (कृत्), न क्षमा अक्षमा (नञ्)।

मन्युव्यवसायदीपिनीः - मन्युश्च व्यवसायश्च मन्युव्यवसायौ (द्वन्द्व), तौ दीपयन्तीति। मन्युव्यवसायदीपिन्यः (द्वि. तत्पु.), ताः मन्युव्यवसायदीपिनीः।

ततस्त्याः - ततः आगताः ततस्त्याः (प. तत्पु.)।

**कोशः।**

'चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः' इत्यमरः।

'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्।

**सारः** - अनन्तरं द्रौपदी शत्रूणामुत्कर्षं श्रुत्वा तदनन्तरं शत्रुभ्यः आगतानपकारान् अपनेतुमसमर्था सति राज्ञः क्रोधोद्योगोत्तेजनकारीः वाच उवाच। शत्रूत्कर्षमाकर्ण्य तत्कृतापकृतिनिराकरणासमर्थापि द्रौपदी शत्रुच्छेदफलकनृपोत्साहवर्धकवचांसि

जगादेत्यर्थः।

**भवादृशेषु प्रमदाजनोदितं**
**भवत्यधिक्षेप इवानुशासनम्।**
**तथापि वक्तुं व्यवसाययन्ति मां**
**निरस्तनारीसमया दुराधयः।। २८।।**

**पदच्छेदः** - भवादृशेषु, प्रमदाजनोदितम्, भवति, अधिक्षेपः, इव, अनुशासनम्, तथापि, वक्तुम्, व्यवसाययन्ति, माम्, निरस्तनारीसमयाः, दुराधयः।

**अन्वयः** - (यद्यपि) भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेपः इव भवति तथापि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति।

**अर्थः।**

**भवादृशेषु** - भवद्विधेषु। **प्रमदाजनोदितम्** - स्त्रीजनकथितम्। **अनुशासनम्** - उपदेशवचनम्। **अधिक्षेपः** - आक्षेपः (तिरस्कारः)। **इव** - तद्वत्। **भवति** - स्यात्। **तथापि** - दुर्वचत्वेऽपि। **निरस्तनारीसमयाः** - ध्वस्तस्त्रीशीलाः। **दुराधयः** - दुष्टमनोव्यथाः। **माम्** - द्रौमपदीम्। **वक्तुम्** - कथयितुम्। **व्यवसाययन्ति** - प्रेरयन्ति।

वि अव इत्युपसर्गद्वयपूर्वक षो - अन्तकर्मणि धातोः णिचि लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | व्यवसाययति | व्यवसाययतः | व्यवसाययन्ति। |
| **म. पु.** | व्यवसाययसि | व्यवसाययथः | व्यवसाययथ। |
| **उ. पु.** | व्यवसाययामि | व्यवसाययावः | व्यवसाययामः। |

**विग्रहः/समासः।**

भवादृशेषु - भवन्तः इव दृश्यन्ते इति भवादृशाः, तेषु भवादृशेषु।

प्रमदाजनोदितम् - प्रमदा एव जनः प्रमदाजनः (कर्म), तेन उदितं प्रमदाजनोदितम् (तृ. तत्पु.)।

निरस्तनारीसमयाः - नारीणां समयाः नारीसमयाः (ष. तत्पु.), निरस्ताः नारीसमयाः यैः ते निरस्तनारीसमयाः (बहु.)।

दुराधयः - दुष्टः आधयः दुराधयः (कर्म.)।

**कोशः।**

'प्रमदा मानिनां कान्ता ललना च नितम्बिनी' इत्यमरः।

'समयाः शपथाचारकालसिद्धान्त संविदः' इत्यमरः।

**अलङ्कारः** - उपमा, काव्यलिङ्गम्।

**सारः** - त्वद्विधेषु स्त्रीजनोदीरितम् आदेशः तिरस्कार इव भवति तथापि (विज्ञेषु आदेशस्याधिक्षेपतुल्यत्वेपि) त्यक्तयोषिदाचाराः मनोव्यथाः मां तादृशवचनमभिधातुं प्रेरयन्ति। शत्रुकृतानादरादुद्भूतायाः मनोव्यथायाः प्रेरणया विज्ञेषु अनादरवचो ब्रवीमि न तु साक्षादित्यर्थः। न हि दुःखिनामुक्तौ युक्तायुक्तविवेको भवतीति भावः।

**अखण्डमाखण्डलतुल्यधामभि-**
**श्चिरं धृता भूपतिभिः स्ववंशजैः।**
**त्वयात्महस्तेन मही मदच्युता**
**मतंगजेन स्त्रगिवापवर्जिता।। २९।।**

**पदच्छेदः** - अखण्डम्, आखण्डलतुल्यधामभिः, चिरम्, धृता, भूपतिभिः, स्ववंशजैः, त्वया, आत्महस्तेन, मही, मदच्युता, मतंगजेन, स्रक्, इव, अपवर्जिता।

**अन्वयः** - आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डं धृता मही मदच्युता मतङ्गजेन स्रक् इव त्वया आत्महस्तेन अपवर्जिता।

**अर्थः।**

**आखण्डलतुल्यधामभिः** - इन्द्रसमतेजोभिः। **स्ववंशजैः** - निजपूर्वजैः - निजकुलजैः। **भूपतिभिः** - भूपैः (राजभिः)। **चिरम्** - दीर्घकालम् (चिराय)। **अखण्डम्** - सम्पूर्णम्। **धृता** - धारिता (उपभुक्ता)। **मही** - पृथिवी। **मदच्युता** - दर्पजलस्राविणा (मदस्राविणा)। **मतङ्गजेन** - मातङ्गेन (मत्तेन हस्तिना)। **स्रक् इव** - माल्यम् इव। **त्वया** - युधिष्ठिरेण। **आत्महस्तेन** - स्वकरेण। **अपवर्जिता** - त्यक्ता (विनाशिता)।

**विग्रहः/समासः।**

आखण्डलतुल्यधामभिः - आखण्डलेन तुल्यं धाम येषां ते (बहु.)।

स्ववंशजैः - स्वस्य वंशः स्ववंशः (ष. तत्पु.), स्ववंशे जाताः स्ववंशजाः (उपपद.), तैः स्ववंशजैः।

भूपतिभिः - भुवः पतयः भूपतयः (ष. तत्पु.), तैः भूपतिभिः।

आत्महस्तेन - आत्मनः हस्तः आत्महस्तः (ष. तत्पु.), तेन आत्महस्तेन।

मदच्युता - मदं च्योततीति मदच्युत् (द्वि. तत्पु.), तेन मदच्युता।

**कोशः**

'आखण्डलः सहस्राक्षः' इत्यमरः।

'वाच्यलिङ्गः समस्तुल्यः सदृक्षः सदृशः सदृक्' इत्यमरः।

'चिराय चिररात्राय चिरस्याद्यश्चिरार्थकाः' इत्यमरः।

'वंशोऽन्ववायः सन्तानः' इत्यमरः।

'माल्यं मालास्रजौ' इत्यमरः।

'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः।

'समग्रं सकलं पूर्णमखण्डं स्यादनूनके' इत्यमरः।

**अलङ्कारः** - उपमा।

**सारः** - इन्द्रसदृशतेजोभिः स्वकुलोत्पन्नैः राजभिः चिरकालं समग्रं यथा स्यात्तथा पालिता पृथ्वी भवता मदस्त्रविणा हस्तिना मालेव स्वकरेण विनाशिता। अरिकृतानादरात्मदुःखप्राप्तौ आत्मदोष एव हेतुः न तु अस्य हेत्वन्तरमस्तीति भावः।

**व्रजन्ति ते मूढधियः पराभवं**
**भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधान्**
**असंवृताङ्गान्निशिता इवेषवः।। ३०।।**

**पदच्छेदः** - व्रजन्ति, ते, मूढधियः, पराभवम्, भवन्ति, मायाविषु, ये, न, मायिनः, प्रविश्य, हि, घ्नन्ति, शठाः, तथाविधान्, असंवृताङ्गान्, निशिताः, इव, इषवः।

**अन्वयः** - ये मायाविषु मायिनः न भवन्ति ते मूढधियः पराभवं व्रजन्ति। शठाः तथाविधान् असंवृताङ्गान् निशिताः इषवः इव प्रविश्य घ्नन्ति।

**अर्थः।**

**ये** - केचन (जनाः इति शेषः) **मायाविषु** - कपटिषु। **मायिनः** - कपटिनः। **न भवन्ति** - न जायन्ते। **ते** - अमायिनः। **मूढधियः** - मन्दबुद्धयः। **पराभवम्** - पराजयम् (अन्याक्रमणम्)। **व्रजन्ति** - यान्ति (प्राप्नुवन्ति)। **हि** - यतः। **शठाः** - मायिनः (धूर्ताः)। **तथाविधान्** - तादृशान्। **असंवृताङ्गान्** - कवचादिनाऽरक्षितदेहान्। **निशिताः** - तीक्ष्णीकृताः। **इषवः इव** - बाणाः इव। **प्रविश्य** - अन्तः प्रविश्य। **घ्नन्ति** - मारयन्ति।

**विग्रहः/समासः।**

मूढधियः - मूढा धीः येषां ते मूढधियः (बहु.)।

मायाविषु - भूयसी माया येषां ते मायाविनः (बहु.), तेषु मायाविषु।

मायिनः - माया अस्ति येषां ते मायिनः (बहु.)।

तथाविधान् - तथा विधा येषां ते तथाविधाः (बहु.), तान् तथाविधान्।

असंवृताङ्गान् - समन्ततो वृतानि अङ्गानि यैः ते संवृताङ्गाः (बहु.), न संवृताङ्गाः असंवृताङ्गाः (नञ्), तान् असंवृताङ्गान्।

**कोशः**

'निकृतस्त्वनृजुः शठः' इत्यमरः।

'कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः' इत्यमरः।

**अलङ्कारः** - संसृष्टिः, उपमा, अर्थान्तरन्यासः।

**सारः** - ये जनाः कपटिषु कपटबुद्धयः न भवन्ति, अल्पबुद्धयः ते जनाः अपमानं प्राप्नुवन्ति। यतः धूर्ताः तथाविधान् अनाच्छादितशरीरान् जनान् तीक्ष्णाः बाणाः इव प्रविश्य घ्नन्ति। अवर्मितशरीरान् निशितेषवः इव मायिनः नाशयन्तीत्यर्थः।

**गुणानुरक्तामनुरक्तसाधनः**
**कुलाभिमानी कुलजां नराधिपः।**
**परैस्त्वदन्यः क इवापहारये-**
**न्मनोरमामात्मवधूमिव श्रियम्।। ३१।।**

**पदच्छेदः** - गुणानुरक्ताम्, अनुरक्तसाधनः, कुलाभिमानी, कुलजाम्, नराधिपः, परैः, त्वदन्यः, कः, इव, अपहारयेत्, मनोरमाम्, आत्मवधूम्, इव, श्रियम्।

**अन्वयः** - अनुरक्तसाधनः कुलाभिमानी नराधिपः त्वदन्यः कः इव गुणानुरक्तां कुलजां मनोरमाम् आत्मवधूम् इव श्रियम् परैः अपहारयेत्।

**अर्थः।**

**अनुरक्तसाधनः** - अनुकूलसहायकः। **कुलाभिमानी** - क्षत्रियत्वाभिमानी। **नराधिपः** - नरपतिः, राजा। **त्वदन्यः** - त्वत्तः भिन्नः। **कः इव** - को वा। **गुणानुरक्ताम्** - सौन्दर्यादिभिरनुरागिणीम्। **कुलजाम्** - वंशक्रमागताम् (कुलीनाम्)। **मनोरमाम्** - हृद्याम्। **आत्मवधूम् इव** - स्वभार्यामिव। **श्रियम्** - राजलक्ष्मीम्। **परैः** - शत्रुभिः। **अपहारयेत्** - त्याजयेत्। अप उपसर्गपूर्वक हृञ् -हरणे धातोः लङ् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | अपहारयेत् | अपहारयेताम् | अपहारयन्। |
| **म. पु.** | अपहारयेः | अपहारयेतम् | अपहारयेत्। |
| **उ. पु.** | अपहारयेयम् | अपहारयेव | अपहारयेम। |

**विग्रहः/समासः।**

गुणानुरक्ताम् - गुणैः अनुरक्ता गुणानुरक्ता (तृ. तत्पु.), ताम् गुणानुरक्ताम्।

अनुरक्तसाधनः - अनुरक्तं साधनं यस्य सः अनुरक्तसाधनः (बहु.)।

कुलाभिमानी - कुलस्य अभिमानः कुलाभिमानः (ष. तत्पु.), कुलाभिमानः विद्यते यस्य सः कुलाभिमानी (बहु.)।

कुलजाम् - कुले जाता इति कुलजा (उपपद. तत्पु.), तां कुलजाम्।

नराधिपः - नराणाम् अधिपः नराधिपः (ष. तत्पु.)।

मनोरमाम् - मनो रमयतीति मनोरमा (द्वि. तत्पु.), तां मनोरमाम्।

आत्मवधूम् - आत्मनः वधूः आत्मवधूः (ष. तत्पु.), ताम् आत्मवधूम्।

**कोशः।**

'निर्वर्त्तनोपकरणानुव्रज्यासु च साधनम्' इत्यमरः।

'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः।

'प्रभुः परिवृढोऽधिपः' इत्यमरः।

**अलङ्कारः** - उपमा।

**सारः** - अनुकूलसहायवान् क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वत्तोपरः कः इव नृपः सन्ध्यादिसौन्दर्यगुणानुरागिणीं वंशक्रमप्राप्तां सत्कुलोद्भवाञ्च हृदयाह्लादिनीं निजस्त्रियमिव लक्ष्मीं शत्रुभिः विनाशयेत्? न हि भवदन्यः कश्चिद्योषितमिव श्रियमपहारयति, किन्तु भवानेवेति श्रियश्चाञ्चल्ये भवदुपेक्षैव हेतुः नान्यः इत्यर्थः। राज्ञां नारीहरणमिव लक्ष्मीहरणमपि निन्दोत्पादकमिति भावः।

**भवन्तमेतर्हि मनस्विगर्हिते**
**विवर्त्तमानं नरदेव वर्त्मनि।**
**कथं न मन्युर्ज्वलयत्युदीरितः**
**शमीतरुं शुष्कमिवाग्निरुच्छिखः।। ३२।।**

**पदच्छेदः** - भवन्तम्, एतर्हि, मनस्विगर्हिते, विवर्त्तमानम्, नरदेव, वर्त्मनि, कथम्, न, मन्युः, ज्वलयति, उदीरितिः, शमीतरुम्, शुष्कम्, इव, अग्निः, उच्छिखः।

**अन्वयः** - (हे) नरदेव! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्त्तमानं भवन्तम् उदीरितः मन्युः उच्छिखः अग्निः शुष्कं शमीतरुम् इव कथं न ज्वलयति।

**अर्थः।**

**(हे) नरदेव** - हे राजन्। **एतर्हि** - अधुना। **मनस्विगर्हिते** - शूरजननिन्दिते। **वर्त्मनि** - मार्गे। **विवर्त्तमानम्** - संस्थितम्। **भवन्तम्** - युधिष्ठिरम्। **उदीरितः** - उद्दीपितः (उद्गतः)। **मन्युः** - क्रोधः (शत्र्वपमानजातामर्षम्)। **उच्छिखः** - उज्ज्वलः। **अग्निः** - वैश्वानरः। **शुष्कम्** - अनार्द्रम्। **शमीतरुम् इव** - शमीसंज्ञकवृक्षेन्धनम् इव। **कथम्** - कस्मात्। **न ज्वलयति** - न दहति।

ज्वल - दीप्तौ धातोः णिचि लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | ज्वलयति | ज्वलयतः | ज्वलयन्ति। |
| **म. पु.** | ज्वलयसि | ज्वलयथः | ज्वलयथ। |
| **उ. पु.** | ज्वलयामि | ज्वलयावः | ज्वलयामः। |

**विग्रहः/समासः।**

मनस्विगर्हिते - मनस्विभिः गर्हितं मनस्विगर्हितम् (तृ. तत्पु.), तस्मिन् मनस्विगर्हिते।

नरदेव - नराणां देवः नरदेवः (ष. तत्पु.), तत्सम्बोधने (हे) नरदेव।

शमीतरुम् - शम्याः तरुः शमीतरुः (ष. तत्पु.), तं शमीतरुम्।

उच्छिखः - उद्गता शिखा यस्य सः उच्छिखः (बहु.)।

**कोशः**

'एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः।

'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः।

**अलङ्कारः** - उपमा।

**सारः** - हे राजन् एतस्मिन् विपत्क्षणे प्राप्तेऽपि वीरपुरुषानाश्रिते मार्गे विद्यमानं त्वां परिवर्धितः कोपः नीरसं शमीवृक्षम् उद्गतज्वालोग्निरिव कुतो न दीपयति। वह्निना शमीवृक्षस्येव भवता क्रोधेन ज्वलनमेवोचितमित्यर्थः।

**अवन्ध्यकोपस्य विहन्तुरापदां**
**भवन्ति वश्याः स्वयमेव देहिनः।**
**अमर्षशून्येन जनस्य जन्तुना**
**न जातहार्देन न विद्विषादरः।। ३३।।**

**पदच्छेदः** - अवन्ध्यकोपस्य, विहन्तुः, आपदाम्, भवन्ति, वश्याः, स्वयम्, एव, देहिनः, अमर्षशून्येन, जनस्य, जन्तुना, न, जातहार्देन, न, विद्विषा, दरः।

**अन्वयः** - अवन्ध्यकोपस्य आपदां विहन्तुः देहिनः स्वयम् एव वश्याः भवन्ति। अमर्षशून्येन जन्तुना जातहार्देन (सति) जनस्य आदरः न (भवति) वा विद्विषा (सति) दरः न (भवति)।

**अर्थः।**

**अवन्ध्यकोपस्य** - अमोघामर्षस्य। **आपदाम्** - विपदाम्। **विहन्तुः** - संहारकस्य। **देहिनः** - प्राणिनः। **स्वयम् एव** - आत्मनैव। **वश्याः** - अधीनाः। **भवन्ति** - जायन्ते। **अमर्षशून्येन** - क्रोधहीनेन। **जन्तुना** - जनेन। **जातहार्देन** - प्राप्तप्रेरणाऽपि। **आदरः** - सत्कारः (सम्मानः)। **न** (भवति)। **विद्विषा** - विरोधिनाऽपि। **दरः** - भयम्। **न** (भवति)।

**विग्रहः/समासः।**

अवन्ध्यकोपस्य - न वन्ध्यः अवन्ध्यः (नञ्), अवन्ध्यः कोपः यस्य तस्य अवन्ध्यकोपस्य (ष. तत्पु.)।

देहिनः - देहो अस्तीति देही (कृत्), ते देहिनः।

अमर्षशून्येन - न मर्षः अमर्षः (नञ्), अमर्षेण शून्यः अमर्षशून्यः (तृ. तत्पु.), तेन अमर्षशून्येन।

जातहार्देन - हृदयस्य कर्म हार्दम् (कर्म), जातं हार्दं यस्य सः/येन सः जातहार्दः (बहु.), तेन जातहार्देन।

विद्विषा - विशेषेण द्वेष्टि इति विद्विट् तेन विद्विषा।

**कोशः**

'कोपक्रोधामर्षरोषप्रतिघारुट् क्रुधौ' इत्यमरः।

'जन्तु जन्यशरीरिणः' इत्यमरः।

'प्रेमा न प्रियता हार्दः प्रेम स्नेहः' इत्यमरः।

'दरोऽस्त्रियां भये श्वभ्रे' इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्।

**सारः** - अनिष्फलक्रोधस्य विपदां विनाशकस्य पुरुषस्य पुरतः जन्तवः आत्मनैव वशंगताः भवन्ति। निष्कोपेन प्राणिना जातस्नेहेन सता लोकस्य सम्मानो न। अमर्षशून्येन शत्रुणा भयमपि न। अमर्षहीनः अगण्यः भवतीत्यर्थः।

**परिभ्रमल्लोहितचन्दनोचितः**
**पदातिरन्तर्गिरि रेणुरूषितः।**
**महारथः सत्यधनस्य मानसं**
**दुनोति नो कच्चिदयं वृकोदरः।। ३४।।**

**पदच्छेदः** - परिभ्रमन्, लोहितचन्दनोचितः, पदातिः, अन्तर्गिरि, रेणुरूषितः, महारथः, सत्यधनस्य, मानसम्, दुनोति, नो, कच्चित्, अयम्, वृकोदरः।

**अन्वयः** - लोहितचन्दनोचितः महारथः अयं वृकोदरः रेणुरूषितः पदातिः (सन्) अन्तर्गिरि परिभ्रमन् सत्यधनस्य (तव) मानसं कच्चित् नो दुनोति।

**अर्थः।**

**लोहितचन्दनोचितः** - रक्तचन्दनचर्चितः। **महारथः** - अतिरथः। **अयम्** - पुरस्थः। **वृकोदरः** - शोकजठरः (भीमः)। **रेणुरूषितः** - धूलिधूसरितः। **पदातिः** - चरणचारी। **अन्तर्गिरि** - पर्वतगुहान्तरे। **परिभ्रमन्** - पर्यटन्। **सत्यधनस्य** - सर्वसत्यात्मकस्य। **मानसम्** - मनः। **कच्चित्** - किम्। **नो** - नहि। **दुनोति** - परितापयति।

दु - उपतापे धातोः लट् परस्मैपदरूपाणि

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | दुनोति | दुनुतः | दुन्वन्ति। |
| **म. पु.** | दुनोषि | दुनुथः | दुनुथ। |
| **उ. पु.** | दुनोमि | दुनुवः/दुन्वः | दुनुमः/दुन्मः। |

**विग्रहः/समासः।**

लोहितचन्दनोचितः - लोहितञ्च असौ चन्दनं च लोहितचन्दनम् (कर्म), तेन उचितः लोहितचन्दनोचितः (तृ. तत्पु.)।

महारथः - महान् रथः यस्य सः महारथः (बहु.)।

वृकोदरः - वृकस्य उदरमिव उदरं यस्य सः वृकोदरः (बहु.)।

रेणुरूषितः - रेणुभिः रूषितः रेणुरूषितः (तृ. तत्पु.)।

पदातिः - पादाभ्याम् अततीति पदातिः (पाद + अत + इण् - पदादेशः)।

अन्तर्गिरि - गिरिषु अन्तः अन्तर्गिरि (अव्ययीभावः)।

सत्यधनः - सत्यमेव धनं यस्य सः सत्यधनः (बहु.)।

**कोशः।**

'लोहितो रोहितो रक्तः' इत्यमरः।

'चित्तं तु चेतो स्वान्तं हृन्मानसं मनः' इत्यमरः।

**अलङ्कारः** - अनुप्रासः, विषमम्, परिकरः। विषमस्य लक्षणम् - विषमं वर्ण्यते यत्र घटनाननुरूपयोः। परिकरस्य लक्षणम् - अलङ्कारः परिकरः साभिप्राये विशेषणे।

**सारः** - प्रागभ्यस्तरक्तचन्दनः प्राङ्महारथसञ्चारी साम्प्रतं धूलिच्छुरितः पादचारी गिरिष्वन्तः परिभ्रमन्नयं भीमः सत्यधनस्य तव हृदयं कश्चिन्न परितापयति किम्। एष तवानुजो भीमः प्राक् सुखी सम्प्रति दुःखी च भवति। तथापि भ्रातृदुःखं विहन्तुं नेच्छसीत्याश्चर्यमित्यर्थः।

**विजित्य यः प्राज्यमयच्छदुत्तरान्**
**कुरूनकुप्यं वसु वासवोपमः।**
**वल्कवासांसि तवाधुनाऽऽहरन्**
**करोति मन्युं न कथं धनञ्जयः।। ३५।।**

**पदच्छेदः** - विजित्य, यः, प्राज्यम्, अयच्छत्, उत्तरान्, कुरून्, अकुप्यम्, वसु, वासवोपमः, सः, वल्कवासांसि, तव, अधुना, आहरन्, करोति, मन्युम्, न, कथम्, धनञ्जयः।

**अन्वयः** - वासवोपमः यः (अर्जुनः) उत्तरान् कुरून् विजित्य प्राज्यम् अकुप्यं वसु अयच्छत्, सः धनञ्जयः अधुना वल्कवासांसि आहरन् तव मन्युं कथं न करोति?

**अर्थः।**

**वासवोपमः** - इन्द्रोपमः। **यः** - यः अर्जुनः। **उत्तरान्** - सिद्धपुरान्तिकवर्तिनः। **कुरून्** - एतादाख्यदेशान्। **विजित्य** - स्वायत्तीकृत्य। **प्राज्यम्** - प्रचुरम् (बहुलम्)। **अकुप्यम्** - कृत्यभिन्नम् (हेमरूप्यरत्नम्)। **वसु** - धनम्। **(भवते)** - युधिष्ठिरस्य। **अयच्छत्** - दत्तवान्। **सः** - उत्तरकुरुविजयी। **धनञ्जयः** - अर्जुनः। **अधुना** - साम्प्रतम्। **वल्कवासांसि** - तरुत्वग्वस्त्राणि। **आहरन्** - गृह्णन्। **तव** - युधिष्ठिरस्य। **मन्युम्** - क्रोधम्। **कथम्** - कस्मात्। **न करोति** - नोत्पादयति।

यम - उपरमे धातोः लङ् परस्मैपदरूपाणि

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | अयच्छत् | अयच्छताम् | अयच्छन्। |
| **म. पु.** | अयच्छः | अयच्छतम् | अयच्छत। |
| **उ. पु.** | अयच्छम् | अयच्छाव | अयच्छाम। |

डुकृञ् करणे धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | करोति | कुरुतः | कुर्वन्ति। |
| **म. पु.** | करोषि | कुरुथः | कुरुथ। |
| **उ. पु.** | करोमि | कुर्वः | कुर्मः। |

**विग्रहः/समासः।**

वासवोपमः - वासवः उपमा यस्य सः वासवोपमः (बहु.)।

अकुप्यम् - कुप्यते इति कुप्यम् (कृत्), न कुप्यम् अकुप्यम् (नञ्)।

प्राज्यम् - प्रवीयते इति प्राज्यम् (कृत्)।

वल्कवासांसि - वल्कलान्येव वासांसि वल्कवासांसि (कर्म.)।

**कोशः**

'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः।

'सुमात्रा गोत्रभिद्वज्री वासवो वृत्रहावृषा' इत्यमरः।

'त्वक् स्त्री वल्कं वल्कलमस्त्रियाम्' इत्यमरः।

**अलङ्कारः** - उपमा, परिकरः, अनुप्रासः, विषमम्।

**सारः** - शक्रतुल्यः यः अर्जुनः मेरुत्तरवर्तिनः कुरून् (मानवजनपदविशेषान्) अतिक्रम्य प्रभूतं स्वर्णरूप्यात्मकं धनम् अददात् सः अर्जुनः सम्प्रति वृक्षत्वगात्मकवस्त्राणि परिदधत् भवतः क्रोधं कुतः न जनयति। यः अर्जुनः जीवनावधिभोग्यं धनं भवत्कोषगृहे स्थापितवान्, सः अधुना वस्त्राभावात्तरुवल्कलपरिधारणेन शोककोपौ कुतो नोत्पादयतीत्यर्थः।

**वनान्तशय्याकठिनीकृताकृती**
**कचाचितौ विष्वगिवागजौ गजौ।**
**कथं त्वमेतौ धृतिसंयमौ यमौ**
**विलोकयन्नुत्सहसे न बाधितुम्।। ३६।।**

**पदच्छेदः** - वनान्तशय्याकठिनीकृताकृती, कचाचितौ, विष्वक्, इव, अगजौ, गजौ, कथम्, त्वम्, एतौ, धृतिसंयमौ, यमौ, विलोकयन्, उत्सहसे, न, बाधितुम्।

**अन्वयः** - वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अगजौ गजौ इव एतौ यमौ विलोकयन् त्वम् (आत्मनः) धृतिसंयमौ बाधितुं कथं न उत्सहसे।

**अर्थः।**

**वनान्तशय्याकठिनीकृताकृती** - गहनवनभूमिशयनादिनाकठोरीभूतकलेवरौ (विपिनमध्यभूशयनकठोरशरीरौ)। **विष्वक्** - परितः (सर्वतः इत्यर्थः)। **कचाचितौ** - केशव्याप्तौ। **अगजौ** - पर्वतीयौ (पर्वतोत्पन्नौ)। **गजौ** - हस्तिनौ इव। **एतौ** - इमौ। **यमौ** - यमजौ (नकुलसहदेवौ इत्यर्थः)। **विलोकयन्** - पश्यन्। **त्वम्** - युधिष्ठिरः। **धृतिसंयमौ** - आत्मनः धैर्यनियमौ। **बाधितुम्** - निरोद्धुम्। **कथम्** - कस्मात्कारणात्। **न उत्सहसे** - न प्रवर्तसे।

उत् उपसर्गपूर्वक षह - मर्षणे धातोः लट् आत्मनेपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | उत्सहते | उत्सहेते | उत्सहन्ते। |
| **म. पु.** | उत्सहसे | उत्सहेथे | उत्सहध्वे। |
| **उ. पु.** | उत्सहे | उत्सहावहे | उत्सहामहे। |

**विग्रहः/समासः।**

वनान्तशय्याकठिनीकृताकृती - वनस्य अन्तः वनान्तः (ष. तत्पु.), वनान्त एव शय्या वनान्तशय्या (कर्म.), न कठिना अकठिना (नञ्), अकठिना कठिना कृता इति कठिनीकृता (अभूततद्भावे च्विः) वनान्तशय्यया कठिनीकृता वनान्तशय्याकठिनीकृता (तृ. तत्पु.), वनान्तशय्याकठिनीकृता आकृतिः ययोः तौ वनान्तशय्याकठिनीकृताकृती (बहु.)।

अगजौ - अगे जायते इति अगजः (उपपदः), तौ अगजौ।

कचाचितौ - कचैः आचितौ कचाचितौ (तृ. तत्पु.)।

धृतिसंयमौ - धृतिश्च संयमश्च धृतिसंयमौ (द्वन्द्व)।

**कोशः**

'समन्ततस्तु परितः पर्वतो विष्वगित्यपि' इत्यमरः।

'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः।

'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः।

**अलङ्कारः** - यमकम्, अनुप्रासः, उपमा। यमकलक्षणम् - अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनश्रुतिः।

**सारः** - वनभूम्यास्तरणरूक्षीकृताकारौ सर्वतः केशव्याप्तौ अत एव वन्यौ गजौ इव स्थितौ एतौ सहजौ पश्यन् धैर्यसन्तोषौ त्यक्तुं कुतो नोत्साहं करोषि। तादृशावस्थापन्नभ्रातृद्वयमवलोक्यापि धैर्यसन्तोषत्यागे मात्सर्यं तवाश्चर्यसूचकमिति भावः।

**इमामहं वेद न तावकी धियम्**
**विचित्ररूपाः खलु चित्तवृत्तयः।**
**विचिन्तयन्त्याः भवदापदां परां**
**रुजन्ति चेतः प्रसभं ममाधयः।। ३७।।**

**पदच्छेदः** - इमाम्, अहम्, वेद, न, तावकी, धियम्, विचित्ररूपाः, खलु, चित्तवृत्तयः, विचिन्तयन्त्याः, भवदापदाम्, पराम्, रुजन्ति, चेतः, प्रसभम्, मम, आधयः।

**अन्वयः** - अहम् इमां तावकीं धियं न वेद। चित्तवृत्तयः विचित्ररूपाः खलु। परां भवदापदां विचिन्तयन्त्याः मम आधयः प्रसभं चेतः रुजन्ति।

**अर्थः।**

**अहम्** - द्रौपदी। **इमाम्** - ईदृशीम्। **तावकीम्** - त्वदीयाम्। **धियम्** - बुद्धिम्। **न वेद** - न जानामि। **चित्तवृत्तयः** - मनोव्यापाराः। **विचित्ररूपाः** - भिन्नभिन्नप्रकाराः। **खलु** - किल (भवन्तीति शेषः)। **पराम्** - अत्यधिकाम्। **भवदापदम्** - भवद्विपत्तिम् - भवतः दुर्दशाम्। **विचिन्तयन्त्याः** - विचारयन्त्याः। **मम** - द्रौपद्याः। **आधयः** - मनोव्यथाः। **प्रसभम्** - बलात्कारेण। **चेतः** - चित्तम्। **रुजन्ति** - व्याकुलीकुर्वन्ति - भञ्जन्ति।

विद - ज्ञाने धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | वेद | विदतुः | विदुः। |
| **म. पु.** | वेत्थ | विदथुः | विद। |
| **उ. पु.** | वेद | विद्वः | विद्मः। |

रुजो - भङ्गे धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | रुजति | रुजतः | रुजन्ति। |
| **म. पु.** | रुजसि | रुजथः | रुजथ। |
| **उ. पु.** | रुजामि | रुजावः | रुजामः। |

**विग्रहः/समासः।**

तावकीम् - तव इयं तावकी, तां तावकीम्।

विचित्ररूपाः - विचित्रं रूपं यासां ताः विचित्ररूपाः (बहु.)।

चित्तवृत्तयः - चित्तस्य वृत्तयः चित्तवृत्तयः (ष. तत्पु.)।

भवदापदम् - भवताम् आपत् भवदापत् (ष. तत्पु.), तां भवदापदम्।

**कोशः।**

'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतीः' इत्यमरः।

'चित्तं तु चेतौ हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः।

'पुंस्याधिर्मानसी व्यथा' इत्यमरः।

'विपत्त्यां विपदापदौ' इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्।

**सारः** - अहम् एतां त्वदीयां बुद्धिं न जानामि। मनोव्यापाराः विविधप्रकाराः खलु। उत्कृष्टां त्वत्क्लेशं विचारयन्त्याः मम मानसव्यथाः हठात् पीडयन्ति।

**पुराधिरूढः शयनं महाधनं**
**विबोध्यसे यः स्तुतिगीतिमङ्गलैः।**
**अदभ्रदर्भामधिशय्य स स्थलीं**
**जहासि निद्रामशिवैः शिवारुतैः।। ३८।।**

**पदच्छेदः** - पुरा, अधिरूढः, शयनम्, महाधनम्, विबोध्यसे, यः, स्तुतिगीतिमङ्गलैः, अदभ्रदर्भाम्, अधिशय्य, सः, स्थलीम्, जहासि, निद्राम्, अशिवैः, शिवारुतैः।

**अन्वयः** - पुरा यः (त्वं) महाधनं शयनम् अधिरूढः (सन्) स्तुतिगीतिमङ्गलैः विबोध्यसे सः त्वम् अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां जहासि।

**अर्थः।**

**पुरा** - पूर्वस्मिन् समये (राज्यारोहणावसरे इत्यर्थः)। **यः** - यः महाराजः (भवान्)। **महाधनम्** - बहुमूल्यम्। **शयनम्** - पर्यङ्कम्। **अधिरूढः** - आरूढः (शयितः)। **स्तुतिगीतिमङ्गलैः** - स्तोत्रगानादिमङ्गलैः। **विबोध्यसे** - विनिद्रो भाव्यसे (वैतालिकैरिति शेषः)। **सः** - एवम्भूतः। **त्वम्** - युधिष्ठिरः। **अदभ्रदर्भाम्** - बहुकुशम् (कुशकष्टकव्यापृतामित्यर्थः)। **स्थलीम्** - प्राकृतभूमिम् (वनभूमिम्)। **अधिशय्य** - शयित्वा। **अशिवैः** - अमङ्गलैः। **शिवारुतैः** - शृगालीरवैः। **निद्राम्** - स्वापम्। **जहासि** - त्यजसि।

वि उपसर्गपूर्वक बुध - अवगमने धातोः लट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | विबोध्यते | विबोध्येते | विबोध्यन्ते। |
| **म. पु.** | विबोध्यसे | विबोध्येथे | विबोध्यध्वे। |
| **उ. पु.** | विबोध्ये | विबोध्यावहे | विबोध्यामहे। |

हाक् - त्यागे धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | जहाति | जहितः/जहीतः | जहति। |
| **म. पु.** | जहासि | जहिथः/जहीथः | जहिथ/जहीथ। |
| **उ. पु.** | जहामि | जहिवः/जहीवः | जहिमः/जहीमः। |

**विग्रहः/समासः।**

महाधनम् - महान्ति धनानि यस्य तत् महाधनम् (बहु.), तत् महाधनम्।

शयनम् - शेते अस्मिन्निति शयनम्, तत् शयनम्।

स्तुतिगीतिमङ्गलैः - स्तुतिश्च गीतिश्च मङ्गलञ्च स्तुतिगीतिमङ्गलानि (समाहारद्वन्द्वः), तैः स्तुतिगीतिमङ्गलैः।

अदभ्रदर्भाम् - न दभ्राः अदभ्राः (नञ्), अदभ्राः दर्भा यस्यां सा अदभ्रदर्भा (बहु.), ताम् अदभ्रदर्भाम्।

अशिवैः - न शिवानि अशिवानि (नञ्), तैः अशिवैः।

शिवारुतैः - शिवानां रुतानि शिवारुतानि (ष. तत्पु.), तैः शिवारुतैः।

**कोशः।**

'शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समा' इत्यमरः।

'अदभ्रं बहुलं बहु' इत्यमरः।

'स्यान्निद्राशयनं स्वापः स्वप्नः संवेश इत्यपि' इत्यमरः।

**अलङ्कारः** - विषमम्, अनुप्रासः।

**सारः** - यः त्वं बहुमूल्यां शय्याम् अधिसुप्तः सन् वैतालिकोक्तगीतिमङ्गलैः पूर्वम् अबुद्धाः सः त्वं प्रचुरकुशाम् असंस्कृतभूमिं शयित्वा अभद्रैः जम्बुकीशब्दैः सम्प्रति शयनं त्यजसि। ईदृशविषमप्राप्तावपि तदप्रतिविधानं शोचनीयमिति भावः।

**पुरोपनीतं नृप रामणीयकं**
**द्विजातिशेषेण यदेतदन्धसा।**
**तदद्य ते वन्यफलाशिनः परं**
**परैति कार्श्यं यशसा समं वपुः।। ३९।।**

**पदच्छेदः** - पुरा, उपनीतम्, नृप, रामणीयकम्, द्विजातिशेषेण, यत्, एतत्, अन्धसा, तत्, अद्यः, ते, वन्यफलाशिनः, परम्, परैति, कार्श्यम्, यशसा, समम्, वपुः।

**अन्वयः** - (हे) नृप! पुरा यत् एतत् (ते वपुः) द्विजातिशेषेण अन्धसा रामणीयकम् उपनीतम्, अद्य, वन्यफलाशिनः तत् ते वपुः यशसा समं परं कार्श्यं परैति।

**अर्थः।**

**हे नृप** - हे राजन्। **पुरा** - पूर्वम् (सिंहासनारूढदशायाम्)। **यत् एतत्** - पुरोवर्तमानम्। **द्विजातिशेषेण** - ब्राह्मणभोजनावशेषेण। **अन्धसा** - अन्नेन। **रामणीयकम्** - दर्शनीयताम् (मनोहरत्वम्)। **उपनीतम्** - प्रापितम्। **अद्य** - वनवाससमये। **वन्यफलाशिनः** - विपिनजातफलमूलभोजिनः। **तत् ते वपुः** - भवतः शरीरम्। **यशसा** - कीर्त्या। **समम्** - सह। **परम्** - अत्यधिकम्। **कार्श्यम्** - खिन्नत्वम् (तनुताम्)। **परैति** - प्राप्नोति।

परा उपसर्गपूर्वक इण् - गतौ धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | परैति | परेतः | परायन्ति। |
| **म. पु.** | परैषि | परेथः | परेथ। |
| **उ. पु.** | परैमि | परेवः | परेमः। |

**विग्रहः/समासः।**

द्विजातिशेषेण - द्वाभ्यां जायन्ते इति द्विजातयः, तेभ्यः शेषः द्विजातिशेषः (प. तत्पु.), तेन द्विजातिशेषेण।

रामणीयकम् - रमणीयस्य भावः रामणीयकम् (कर्म)।

वन्यफलाशिनः - वने भवानि वन्यानि, वन्यानि फलानि वन्यफलानि (सुप्सुपा), तानि अश्नाति वन्यफलाशी, तस्य वन्यफलाशिनः।

**कोशः।**

'दन्तविप्राण्डजा द्विज' इत्यमरः।

'यशः कीर्तिः समज्ञा च' इत्यमरः।

'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः।

**अलङ्कारः** - सहोक्तिः। लक्षणम् - सहोक्तिः सहभावश्चेत्भासते जनरञ्जनः।

**सारः** - हे राजन् एतत् शरीरं पूर्वं ब्राह्मणोच्छिष्टेनान्नेन पुष्टिं प्रापितम्। साम्प्रतं वन्यफलभक्षितुः तव कीर्त्या साकम् अतिशयं क्षीणतां प्राप्नोति।

**अनारतं यौ मणिपीठशायिना-**
**वरञ्जयद्राजशिरः स्रजां रजः।**
**निषीदतस्तौ चरणौ वनेषु ते**
**मृगद्विजालूनशिखेषु बर्हिषाम्।। ४०।।**

**पदच्छेदः** - अनारतम्, यौ, मणिपीठशायिनौ, अरञ्जयत्, राजशिरःस्रजाम्, रजः, निषीदतः, तौ, चरणौ, वनेषु, ते, मृगद्विजालूनशिखेषु, बर्हिषाम्।

**अन्वयः** - राजशिरःस्रजां रजः अनारतं मणिपीठशायिनौ यौ अरञ्जयत् तौ ते चरणौ मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः।

**अर्थः।**

**राजशिरःस्रजाम्** - प्रणन्महीपतिमौलिमालानाम्। **रजः** - परागः। **अनारतम्** - सततम्। **मणिपीठशायिनौ** - रत्नमयपादपीठस्थायिनौ। **यौ** - यौ चरणौ। **अरञ्जयत्** - रञ्जितवत्। **तौ** - पूर्वशोभितौ। **ते** - तव - भवतः। **चरणौ** - पादौ। **मृगद्विजालूनशिखेषु** - हरिणविप्रलुञ्जिताग्रेषु। **बर्हिषाम्** - दर्भाणाम्। **वनेषु** - विपिनेषु। **निषीदतः** - तिष्ठतः।

रञ्ज - रागे धातोः णिचि परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | अरञ्जयत् | अरञ्जयताम् | अरञ्जयन्। |
| **म. पु.** | अरञ्जयः | अरञ्जयतम् | अरञ्जयत। |
| **उ. पु.** | अरञ्जयम् | अरञ्जयाव | अरञ्जयाम। |

नि उपसर्गपूर्वक षद्लृ - विशरणगत्यवसादनेषु धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | निषीदति | निषीदतः | निषीदन्ति। |
| **म. पु.** | निषीदसि | निषीदथः | निषीदथ। |
| **उ. पु.** | निषीदामि | निषीदावः | निषीदामः। |

**विग्रहः/समासः।**

मणिपीठशायिनौ - मणीनां पीठं मणिपीठम् (ष. तत्पु.), मणिपीठे शायेते मणिपीठशायिनौ (स. तत्पु.), तौ मणिपीठशायिनौ।

राजशिरःस्रजाम् - राज्ञां शिरांसि राजशिरांसि (ष. तत्पु.), तेषां स्रजः याः ताः राजशिरः स्रजः (बहु.), तासां राजशिरःस्रजाम्।

मृगद्विजालूलशिखेषु - मृगाश्च द्विजाश्च मृगद्विजाः (द्वन्द्वः), तैः आलूनाः (ईषच्छिन्नाः) शिखाः येषां तानि मृगद्विजालूनशिखानि (बहु.), तेषु मृगाद्विजालूनशिखेषु।

**कोशः।**

'सततानारताश्रान्तसन्तताविरतानिशम्' इत्यमरः।

'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इत्यमरः।

'दन्तविप्राण्डजाः द्विजाः' इत्यमरः।

**अलङ्कारः** - विषमम्।

**सारः** - पुरा सततं मणिपीठवर्तिनौ यौ पादौ नमद्भूपमौलिवर्तिमाल्यानां परागः अरञ्चयत् इदानीं तौ तव पादौ हरिणतपस्विजनाच्छिन्नाग्रभागेषु कुशानां काननेषु तिष्ठतः। अतः परं किं दुःखमित्यर्थः।

**द्विषन्निमित्ता यदियं दशा ततः**
**समूलमुन्मूलयतीव मे मनः।**
**परैरपर्यासितवीर्यसम्पदां**
**पराभवोऽप्युत्सव एव मानिनाम्।। ४१।।**

**पदच्छेदः** - द्विषन्निमित्ता, यत्, इयम्, दशा, ततः, समूलम्, उन्मूलयति, इव, मे, मनः, परैः, अपर्यासितवीर्यसम्पदाम्, पराभवः, अपि, उत्सवः, एव, मानिनाम्।

**अन्वयः** - यत् इयं दशा द्विषन्निमित्ता (तव अस्ति), ततः समूलं मे मनः उन्मूलयति इव। परैः अपर्यासितवीर्यसम्पदां मानिनां पराभवः अपि उत्सवः एव (भवति)।

**अर्थः।**

**यत्** - यस्मात्कारणात्। **इयम्** - वनवासरूपानुभूयमाना। **दशा** - अवस्था। **द्विषन्निमित्ता** - शत्रुहेतुकी। **ततः** - तस्मात्कारणात्। **समूलम्** - साशयम्। **मे** - द्रौपद्याः। **मनः** - मानसम्। **उन्मूलयति** - उत्पाट्यति। **इव** - इव। **परैः** - शत्रुभिः। **अपर्यासितवीर्यसम्पदाम्** - अपर्यावर्तितपौरुषसम्पत्तीनाम् (अनवरुद्धविक्रमाणामित्यर्थः)। **मानिनाम्** - मनस्विनाम्। **पराभवः अपि** - पराजयः अपि। **उत्सवः एव** - सुखकरः एव (हर्षोदयः एव भवतीत्यर्थः)।

उत् उपसर्गपूर्वक मूल - रोहणे धातोः णिचि लट् परस्मैपदरूपाणि।

| | | |
|---|---|---|
| उन्मूलयति | उन्मूलयतः | उन्मूलयन्ति। |
| उन्मूलयसि | उन्मूलयथः | उन्मूलयथ। |
| उन्मूलयामि | उन्मूलयावः | उन्मूलयामः। |

**विग्रहः/समासः।**

द्विषन्निमित्ता - द्विषन्तः निमित्तं यस्याः सा द्विषन्निमित्ता (बहु.)।

समूलम् - मूलेन सहितम् समूलम् (तुल्ययोग बहु.)।

अपर्यासितवीर्यसम्पदाम् - न पर्यासिता अपर्यासिता (नञ्), वीर्यस्य सम्पत् वीर्यसम्पत् (ष. तत्पु.), अपर्यासिता वीर्यसम्पत् येषां ते अपर्यासितवीर्यसम्पदः (बहु.), तेषां अपर्यासितवीर्यसम्पदाम्।

**कोशः।**

'पराभवः परिभवः पराजय इतीर्यते' इत्यमरः।

'अथ क्षण उद्धर्षो मह उद्भव उत्सवः' इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः, उत्प्रेक्षा।

**सारः** - यस्मात्कारणात् एषा अवस्था शत्रुहेतुका, तस्मात्कारणात् मम चित्तं समग्रं यथा तथा उत्क्षिपतीव शत्रुभिः अतिरस्कृतपौरुषैश्वर्याणां मानिनां तिरस्कारोऽपि सुखप्रद एव न तु मानहानिरिति शेषः। मानिनां मानभङ्गः एव दुःसहः, न तु पराभवः इति भावः।

**विहाय शान्तिं नृप धाम तत्पुनः**
**प्रसीद सन्धेहि वधाय विद्विषाम्।**
**व्रजन्ति शत्रूनवधूय निःस्पृहा**
**शमेन सिद्धिं मुनयो न भूभृतः।। ४२।।**

**पदच्छेदः** - विहाय, शान्तिम्, नृप, धाम, तत्, पुनः, प्रसीद, सन्धेहि, वधाय, विद्विषाम्, व्रजन्ति, शत्रून्, अवधूय, निःस्पृहाः, शमेन, सिद्धिम्, मुनयः, न, भूभृतः।

**अन्वयः** - (हे) नृप! शान्तिं विहाय विद्विषां वधाय पुनः तत् धाम सन्धेहि प्रसीद। निःस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति। (किन्तु) भूभृतः (तथा) न।

**अर्थः।**

**(हे) नृप** - हे राजन्। **शान्तिम्** - क्षमाम्। **विहाय** - त्यक्त्वा। **विद्विषाम्** - शत्रूणाम्। **वधाय** - नाशाय। **पुनः** - भूयः। **तत्** - स्वकीयं पौर्विकम्। **धाम** - तेजः। **सन्धेहि** - अङ्गीकुरु। **प्रसीद** - मम प्रार्थनां स्वीकुरु। **निःस्पृहाः** - निरभिलाषाः। **मुनयः** - ऋषयः। **शत्रून्** - कामादीन् रिपून्। **अवधूय** - विनाश्य (दूरीकृत्य)। **शमेन** - शान्त्या। **सिद्धिम्** - मुक्तिम्। **व्रजन्ति** - यान्ति (लभन्ते)। **भूभृतः** - राजानः। **तथा न** - तथा शमेन सिद्धिं न लभन्ते।

सम् उपसर्गपूर्वक डुधाञ् - दानधारणपोषणेषु धातोः लोट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | सन्दधातु/सन्धत्तात् | सन्धत्ताम् | सन्दधतु। |
| **म. पु.** | सन्धेहि/सन्धत्तात् | सन्धत्तम् | सन्धत्त। |
| **उ. पु.** | सन्दधानि | सन्दधाव | सन्दधाम। |

प्र उपसर्गपूर्वक षद्लृ - विशरणगत्यवसादनेषु धातोः लोट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | प्रसीदतु/ प्रसीदतात् | प्रसिदताम् | प्रसीदन्तु |
| **म. पु.** | प्रसीद/प्रसीदतात् | प्रसीदतम् | प्रसीदतु। |
| **उ. पु.** | प्रसीदानि | प्रसीदाव | प्रसीदाम। |

व्रज - गतौ धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| प्र. पु. | व्रजति | व्रजतः | व्रजन्ति। |
| म. पु. | व्रजसि | व्रजथः | व्रजथ। |
| उ. पु. | व्रजामि | व्रजावः | व्रजामः। |

**विग्रहः/समासः।**

निस्पृहाः - निर्गताः स्पृहाः येषां ते निःस्पृहाः (बहु.)।

भूभृतः - भुवं बिभ्रतीति भूभृतः (उपपद)।

**कोशः।**

'शमनन्तु शमः शान्तिः' इत्यमरः।

'गृहदेहत्विट्प्रभावा धामानि' इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः, अनुप्रासः।

**सारः** - हे राजन् तितिक्षां परित्यज्य स्वसिद्धं पौरुषं शत्रूणां विनाशाय भूयः स्वीकुरु। प्रसन्नो भव। निराकाङ्क्षिणः तपस्विनः रिपून् तिरस्कृत्य शान्त्या मुक्तिरूपाम् प्राप्नुवन्ति। किन्तु राजानः रिपुपराजयात्मककार्यसिद्धिं नाधिगच्छन्ति। मोक्षात्मकं कार्यमिव राजकार्यं न शान्तिसाध्यमिति शत्रुविनाशसाधकतेजो ग्राह्यमिति भावः।

**पुरःसरा धामवतां यशोधनाः**
**सुदुःसहं प्राप्य निकारमीदृशम्।**
**भवादृशाश्चेदधिकुर्वते रतिं**
**निराश्रया हन्त हता मनस्विता।। ४३।।**

**पदच्छेदः** - पुरःसराः, धामवताम्, यशोधनाः, सुदुःसहम्, प्राप्य, निकारम्, ईदृशम्, भवादृशाः, चेत्, अधिकुर्वते, रतिम्, निराश्रया, हन्त, हता, मनस्विता।

**अन्वयः** - धामवतां पुरःसराः यशोधनाः भवादृशाः (जनाः) सुदुःसहम् ईदृशं निकारं प्राप्य रतिम् अधिकुर्वते चेत्, हन्त! मनस्विता निराश्रया (सती) हता।

**अर्थः।**

**धामवताम्** - तेजस्विनाम्। **पुरःसराः** - अग्रगण्याः (मुख्याः)। **यशोधनाः** - कीर्तिवित्ताः। **भवादृशाः** - त्वादृशाः (त्वत्तुल्याः)। **सुदुःसहम्** - अतिदुःसहम्। **ईदृशम्** - एवंविधम्। **निकारम्** - शत्रुकृततिरस्कारम् (पराभवम्)। **प्राप्य** - लब्ध्वा। **रतिम्** - तुष्टिम्। **अधिकुर्वते** - अङ्गीकुर्वन्ति। **चेत्** - यदि। **हन्त** - खेदे। **मनस्विता** - स्वतन्त्रता। **निराश्रया सती** - निराधारा सती। **हता** - मृता।

अधि उपसर्गपूर्वक डुकृञ् - करणे धातोः लट् आत्मनेपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| प्र. पु. | अधिकुरुते | अधिकुर्वाते | अधिकुर्वते। |
| म. पु. | अधिकुरुषे | अधिकुर्वाथे | अधिकुरुध्वे। |
| उ. पु. | अधिकुर्वे | अधिकुर्वहे | अधिकुर्महे। |

**विग्रहः/समासः।**

पुरःसराः - पुरः सरन्तीति पुरःसराः।

धामवताम् - धाम विद्यते येषां ते धामवन्तः (बहु.), तेषां धामवताम्।

यशोधनाः - यशांसि एव धनानि येषां ते यशोधनाः (बहु.)।

भवादृशाः - भवानिव दृश्यन्ते ये ते भवादृशाः (बहु.)।

निराश्रया - निर्गतः आश्रयः यस्याः सा निराश्रया (बहु.)।

मनस्विता - मनस्विनः भावः मनस्विता (कर्म.)।

**कोशः।**

'पुरःसरः अग्रगण्या धुरीणाश्च पुरोगमाः' इति कोशः।

'निकारो हि तिरस्कारोऽपमानश्च पराभवः' इति कोशः।

**अलङ्कारः** - परिकरः।

**सारः** - तेजस्विनामग्रगामिनः कीर्तिसर्वस्वाः त्वत्सदृशाः नराः सोढुमनर्हं उक्तविधं शत्रुकृतानादरं अधिकृत्य प्रीतिं विदधते चेत्तर्हि अभिमानिता निरवलम्बा सति विनष्टा। उत्कृष्टशालिनो भवादृशा अपि जनाः यदि शत्रुकृतपराभवं न प्रतिकुर्युः तर्हि मनस्विजनैकशरणाभिमानिता हतैवेत्यर्थः। अतः पराक्रमो विधातव्य इति भावः।

**अत क्षमामेव निरस्तविक्रम-**
**श्चिराय पर्येषि सुखस्य साधनम्।**
**विहाय लक्ष्मीपतिलक्ष्म कार्मुकं**
**जटाधरः सञ्जुहुधीह पावकम्।। ४४।।**

**पदच्छेदः** - अथ, क्षमाम्, एव, निरस्तविक्रमः, चिराय, पर्येषि, सुखस्य, साधनम्, विहाय, लक्ष्मीपतिलक्ष्म, कार्मुकम्, जटाधरः, सन्, जुहुधि, इह, पावकम्।

**अन्वयः** - अथ निरस्तविक्रमः (सन्) चिराय सुखस्य साधनं क्षमाम् एव पर्येषि (तर्हि) लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः सन् इह पावकं जुहुधि।

**अर्थः।**

**अथ** - यदि। **निरस्तविक्रमः** - उत्साहहीनः सन्। **चिराय** - चिरकालम्। **सुखस्य** - आनन्दस्य। **साधनम्** - सहायकम् (उपायम्)। **क्षमाम्** - शान्तिम्। **एव** - निश्चयेन। **पर्येषि** - अवगच्छसि। **तर्हि** - तदा। **लक्ष्मीपतिलक्ष्म** - राजचिह्नम्। **कार्मुकम्** - चापम्। **विहाय** - परित्यज्य (त्यक्त्वा)। **जटाधरः** - सम्बद्धकेशधारी (तापसः सन्)। **इह** - कानने। **पावकम्** - अग्निम्। **जुहुधि** - होमं कुरु।

परि उपसर्गपूर्वक इण् - गतौ धातोः लट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | पर्येति | पर्येतिः/परीतः | परियन्ति। |
| **म. पु.** | पर्येषि | पर्येथः/परीथः | पर्येथ/परीथ। |
| **उ. पु.** | पर्येमि | पर्येवः/परीवः | पर्येमः/परीमः। |

हु - दानादानयोः धातोः लोट् परस्मैपदरूपाणि।

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| **प्र. पु.** | जुहोतु/जुहुतात् | जुहुतां | जुह्वन्तु। |
| **म. पु.** | जुहोधि/जुहुतात् | जुहुत | जुहुत |
| **उ. पु.** | जुहवानि | जुहवाव | जुहवाम। |

**विग्रहः/समासः।**

निरस्तविक्रमः - निरस्तः विक्रमः येन सः निरस्तविक्रमः (बहु.)।

लक्ष्मीपतिलक्ष्म - लक्ष्म्याः पतिः लक्ष्मीपतिः (ष. तत्पु.), तस्य लक्ष्म यस्मिन् तत् लक्ष्मीपतिलक्ष्म (बहु.), तत् लक्ष्मीपतिलक्ष्म।

जटाधरः - जटानां धरः, जटाधरः (ष.तत्पु.)।

**कोशः।**

'क्षितिक्षान्तयोः क्षमा' इत्यमरः।

'धनुश्चापौ धन्वशरासनको दण्डकार्मुकम्' इत्यमरः।

**अलङ्कारः** - अनुप्रासः, हेत्वलङ्कारः। हेत्वलङ्कारलक्षणम् - हेतोर्हेतुमतासार्थं वर्णनं हेतुरुच्यते।

**सारः** - अथवा त्यक्तपौरुषः सन् चिरकालपर्यन्तं शान्तिमेव आनन्दस्य कारणं जानसि चेत् नृपचिह्नं धनुः परित्यज्य मुनिवेषधारी सन् अस्मिन् वने वह्निं तर्पय।

**न समयपरिरक्षणं क्षमं ते**
**निकृतिपरेषु परेषु भूरिधाम्नः।**
**अरिषु हि विजयार्थिनः क्षितीशाः**
**विदधति सोपधि सन्धिदूषणानि।। ४५।।**

**पदच्छेदः** - न, समयपरिरक्षणम्, क्षमम्, ते, निकृतिपरेषु, परेषु, भूरिधाम्नः, अरिषु, हि, विजयार्थिनः, क्षितीशाः, विदधति, सोपधि, सन्धिदूषणानि।

**अन्वयः** - परेषु निकृतिपरेषु (सत्सु) भूरिधाम्नः ते समयपरिरक्षणं न क्षमम्। हि विजयार्थिनः क्षितीशाः अरिषु सोपधि सन्धिदूषणानि विदधति।

**अर्थः।**

**परेषु** - शत्रुषु। **निकृतिपरेषु** - निराकरणतत्परेषु (अपकारकेषु)। **भूरिधाम्नः** - बहुतेजसः। **ते** - तव (युधिष्ठिरस्य)। **समयपरिरक्षणम्** - कालप्रतीक्षाकरणम् (प्रतिज्ञापालनम्)। त्रयोदशवर्षाणि वने वत्स्यामि इत्येवं रूपा प्रतीक्षा। **न** - न हि। **क्षमम्** - युक्तम्। **हि** - यतः (यस्मात्कारणात्)। **विजयार्थिनः** - शत्रुपराजयकार्मुकाः (विजिगीषवः)। **क्षितीशाः** - भूपतयः। **अरिषु** - शत्रुषु। **सोपधि** - कपटपूर्वकम्। **सन्धिदूषणानि** - मैत्रीच्छिद्राणि। **विदधति** - कुर्वन्ति (केनापि कपटेन सन्धिं भेदयन्तीति भावः)।

वि उपसर्गपूर्वक डुधाञ् - दानधारणपोषणेषु धातोः लट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | विदधाति | विधत्तः | विदधति। |
| **म. पु.** | विदधासि | विधत्थः | विधत्थ। |
| **उ. पु.** | विदधामि | विदध्वः | विदध्मः। |

**विग्रहः/समासः।**

निकृतिपरेषु - निकृतिः परं (प्रधानं) येषां ते निकृतिपराः (बहु.), तेषु निकृतिपरेषु।

भूरिधाम्नः - भूरि धाम यस्य तस्य भूरिधाम्नः (बहु.)।

समयपरिरक्षणम् - समयस्य परिरक्षणं समयपरिरक्षणम् (ष.तत्पु.)।

विजयार्थिनः - विजयस्य अर्थः (प्रयोजनं) अस्ति येषां ते विजयार्थिनः (बहु.)।

सोपधि - उपाधिना सहितम् सोपधि (तुल्ययोग बहु.)।

क्षितीशाः - क्षितेः ईशाः क्षितीशाः (ष. तत्पु.)।

सन्धिदूषणानि - सन्धेः दूषणानि सन्धिदूषणानि (ष. तत्पु.), तानि सन्धिदूषणानि।

**कोशः।**

'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः।

'पुरुहूः पुरू भूयिष्ठं स्फारं भूयश्च भूरि च' इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः, यमकम्, अनुप्रासः।

**वृत्तम्** - पुष्पिताग्रा।

लक्षणम् - अयुजिनयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा।

अयुजि - विषमपादे - १, ३ - न न र य।

युजि - समपादे - २, ४ - न ज ज र गुरु।

न न र य

– – – – – – U – U – U U

न सम यपरि रक्षणं क्षमं ते

न ज ज र गुरु

– – – – U – – U – U – U U

निकृति परेषु परेषु भूरिधा म्नः

**सारः** - शत्रुषु शाठ्यप्रधानेषु सत्सु अतितेजस्विनः तव त्रयोदशवर्षात्मककालप्रतीक्षणं नोचितम्। यतः विजयाभिलाषिणः राजानः शत्रुषु विषये सव्याजं यथा तथा मैत्रीभङ्गानि कुर्वन्ति। शक्तिमतां कार्यविधानमेव सर्वथा श्रेयः। समयापेक्षणादिकन्त्वशक्तानामिति भावः।

**विधिसमयनियोगाद्दीप्तिसंहारजिह्मम्**
**शिथिलवसुमगाधे मग्नमापत्ययोधौ।**
**रिपुतिमिरमुदस्योदीयमानं दिनादौ**
**दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः।। ४६।।**

**पदच्छेदः** - विधिसमयनियोगात्, दीप्तिसंहारजिह्मम्, शिथिलवसुम्, अगाधे, मग्नम्, आपत्ययोधौ, रिपुतिमिरम्, उदस्य, उदीयमानम्, दिनादौ, दिनकृतम्, इव, लक्ष्मीः, त्वाम्, समभ्येतु, भूयः।

**अन्वयः** - विधिसमयनियोगात् अगाधे आपत्ययोधौ मग्नं दीप्तिसंहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतमिव लक्ष्मीः भूयः सम्भ्येतु।

**राजपक्षेऽर्थः**

**विधिसमयनियोगात्** - दुर्दैववशात् (दैवकालानुरोधात्)। **अगाधे** - गम्भीरे। **आपत्ययोधौ** - विपत्समुद्रे। **मग्नम्** - निपतितम्। **दीप्तिसंहारजिह्मम्** - तेजोविनाशशिथिलम्। **शिथिलवसुम्** - क्षीणधनम्। **रिपुतिमिरम्** - वैरिरूपान्धकारम्। **उदस्य** - दूरीकृत्य। **उदीयमानम्** - उद्यन्तम्। **त्वाम्** - भवन्तम्। **दिनादौ** - प्रभाते। **दिनकृतम्** - दिनमणिमिव। **लक्ष्मीः** - राजलक्ष्मीः। **भूयः** - पुनरपि। **समभ्येतु** - भजतु।

**सूर्यपक्षेऽर्थः।**

**विधिसमयनियोगात्** – दैववशात् (सन्ध्यादि कालवशात्)। **अगाधे** – दुस्तरे आपत्सागरे। **मग्नम्** – निपतितम्। **दीप्तिसंहारजिह्मम्** – आतपविनाशखिन्नम्। **शिथिलवसुम्** – शिथिलरश्मिम्। **रिपुतिमिरं** – शत्रुरूपान्धकारम्। **उदस्य** – निरस्य। **उदीयमानम्** – उदयम् गच्छन्तम्। **दिनकृतम्** – भास्करमपि। **दिनादौ** – प्रभाते। **लक्ष्मीः** – शोभा। **भूयः समभ्येतु** – पुनः प्राप्नोतु।

सम् अभि इत्युपसर्गद्वयपूर्वक इण् – गतौ धातोः लोट् परस्मैपदरूपाणि।

| | **ए. व.** | **द्वि. व.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | समभ्येतु/समभ्येतात् | समभ्येताम् | समभियन्तु। |
| **म. पु.** | समभ्येहि/समभ्येतात् | समभ्येतम् | समभ्येत। |
| **उ. पु.** | समभ्ययानि | समभ्ययाव | समभ्ययाम। |

**विग्रहः/समासः।**

विधिसमयनियोगात् – विधिश्च समयश्च विधिसमयौ (द्वन्द्व), तयोः नियोगः विधिसमयनियोगः (ष. तत्पु.), तस्मात् विधिसमयनियोगात्।

दीप्तिसंहारजिह्मम् – दीप्तेः संहारः दीप्तिसंहारः (ष. तत्पु.), तेन जिह्मः दीप्तिसंहारजिह्मः (तृ. तत्पु.), तं दीप्तिसंहारजिह्मम्।

शिथिलवसुम् – शिथिलं वसु यस्य सः शिथिलवसुः (बहु.), तं शिथिलवसुम्।

आपत्पयोधौ – आपत् पयोधिः इव आपत्पयोधिः (कर्म.), तस्मिन् आपत्पयोधौ।

रिपुतिमिरम् – रिपुः तिमिरमिव रिपुतिमिरम् (कर्म.), तत् रिपुतिमिरम्।

दिनादौ – दिनस्य आदिः दिनादिः (ष. तत्पु.), तस्मिन् दिनादौ।

दिनकृतम् – दिनं करोति इति दिनकृत् (क्विप्), तं दिनकृतम्।

अगाधे – गाध्यते इति गाधः (कृत्), न गाधः अगाधः (नञ्), तस्मिन् अगाधे।

**कोशः।**

‘विधिर्विधाने दैवे च’ इत्यमरः।

‘अगाधमतलस्पर्शं’ इत्यमरः।

‘अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरः तमः’ इत्यमरः।

**अलङ्कारः** – पूर्णोपमा, श्लेषः, काव्यलिङ्गम्। श्लेषस्य लक्षणम् – नानार्थसंश्रय श्लेषः वर्ण्यावर्ण्योभयाश्रितः।

**वृत्तम्** – मालिनी – लक्षणम् – ननमयययुतेयं मालिनी भोगिलोकैः।

न न म य य

– – – – – – U U U – U U – U U

विधिस मयनि योगाद्दी प्तिसंहा रजिह्मम्,

**सारः** – दैवकालानतिक्रमणात् दुरवगाहे दुःखार्णवे पतितं प्रतापक्षयाप्रसन्नं विनष्टधनं शत्र्वन्धकारं विनाश्य विद्यमानं भवन्तं प्रातः काले दैवकालानतिक्रमणात् दुस्तरे आपत्पयोधौ पतितं आपदविनाशनिःस्तेजस्कं शिथिलरश्मिं शत्रुसदृशान्धकारं निरस्य उद्यन्तं सूर्यमिव सम्पत्तिः शोभा च भूयः समाश्रयतु। प्रातरुदीयमानं सूर्यं यथा लक्ष्मीः आश्रयति तथैव त्वामपि सा पुनराश्रयत्वित्यर्थः।

*****